शास्त्रसंदेश-३७

# स्तोत्रसंदेशमाला

## श्रीपार्श्वनाथजिनस्तोत्राणि-३

११



मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-३७

# स्तोत्र संदेशमाला-११

## श्रीपार्श्वनाथजिनस्तोत्राणि-३

: સંપાદક - સંકલન :
પ.પૂ.આચાર્ય ભ.શ્રીમદ્
વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી
પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના
શિષ્યરત્ન
પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.

પ્રકાશક-પ્રાપ્તિ સ્થાન

शास्त्रसंदेश

C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,
આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

**સ્તોત્ર સંદેશમાલા-૧૧**

**श्रीपार्श्वनाथजिनस्तोत्राणि-३**

આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૪ + ૨૩૬ + ૬

સ્તોત્ર : ૧૦૯ શ્લોક : ૧૬૬૦


**: પ્રમાર્જના :**

પૂ.આ.શ્રી **દીવ્યકીર્તિસૂરિશ્વરજી** મ.સા.

પૂ.પં.શ્રી **શ્રુતતિલકવિજયજીગણી**

પૂ.મુ.શ્રી **હિતરક્ષિતવિજયજી** મ.સા.

**: છંદ-સંયોજના :**

પૂ.સા.શ્રી **ભવ્યરત્નાશ્રીજી** મ.સા.ના શિષ્યા

પૂ.સા. શ્રી **પુણ્યરત્નાશ્રીજી** મ.સા.


ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.


વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

આભાર...!　　અનુમોદનીય...!　　અનુકરણીય...!



## સ્તોત્ર સંદેશમાલાના
## ભાગ ૧૧-૧૨ ના
## દ્રવ્ય લાભાર્થી



## શ્રી શ્વેતામ્બતર મૂર્તિપૂજક તપગચ્છ
## ગુજરાતી જૈન સંઘ માલેગાંવ (મહારાષ્ટ્ર)

*આપશ્રીએ જ્ઞાનદ્રવ્યથી કરેલી શ્રુતભક્તિની*
*અમો હાર્દિક અનુમોદના કરીએ છીએ.*
*ટ્રસ્ટીગણ ના અમો*
*આભારી છીએ.*

*શાસ્ત્રસંદેશ, સુરત*







**સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ

*(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)*

**સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોમાંથી અમુક સ્તોત્રો લીધેલા છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) વિવિધ કલ્પ સંગ્રહ

(૨) નમસ્કાર સ્વાધ્યાય ભાગ ૧,૨, ૩

(૩) સરસ્વતી પ્રાસાદ

(૪) કાવ્ય સંગ્રહ ભાગ ૧,૨

(૫) વર્ધમાન વિદ્યાકલ્પ

(૬) વિધિ માર્ગપ્રપા

(૭) શ્રી વલ્લભીય લઘુકૃતિ સમુચ્ચય

(૮) સમયસુન્દર કૃતિ કુસુમાંજલી

(૯) ચતુર્વિંશતિ જિનેન્દ્ર સ્તવનાવલિ

(૧૦) શ્રી જિનવલ્લભસૂરિ ગ્રંથાવલિ

(૧૧) યુગાદિવંદના

(૧૨) શ્રી અજીતનાથ વંદનાવલી

(૧૩) શ્રી સંભવનાથ વંદનાવલી

(૧૪) શ્રી પ્રકરણ રત્નાકર ભાગ-૨

(૧૫) મહાકવિ શ્રી જયશેખરસૂરિ ભાગ-૨

(૧૬) શ્રી પાર્શ્વનાથ ઉપાસના

(૧૭) મહાપ્રભાવિક નવસ્મરણ

(૧૮) ભૈરવ પદ્માવતી કલ્પ

(૧૯) તુલસીપ્રજ્ઞા (પાર્શ્વ સ્તુતિ સંગ્રહ)

(૨૦) ધર્મવર્દ્ધન ગ્રન્થાવલી

(૨૧) બૃહત્ હ્રીંકારકલ્પ વિવરણ તથા વર્ધમાન વિદ્યા કલ્પ

(૨૨) શ્રી ઋષભ-વીરેશાદિ ચતુર્વિંશતિ જિન સ્તવનાવલી

(૨૩) મન્ત્ર કલ્પ સંગ્રહ

(૨૪) શ્રી જિનેન્દ્ર નમસ્કારાદિ સંગ્રહ

(૨૫) ગિરનાર ગ્રંથોની ગોદમાં

(૨૬) સૂરિમન્ત્ર સમુચ્ચય ભાગ-૧/૨

(૨૭) શ્રી જીરાવલા સ્તોત્રાદિ સંગ્રહ

(૨૮) સમ્બોધિ (ઈ.સ. ૨૦૧૪ સુધીના)

(૨૯) નિશ્રેયસમ્ ભાગ ૧ થી ૧૧

(૩૦) શ્રુતસાગર - કોબા

---

*આ સિવાયના પણ અનેક પુસ્તકોમાંથી સ્તોત્રો એકત્રિત કરવામાં આવેલ છે તે સર્વેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

---

સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં એકત્રિત કરેલ સ્તોત્રોના પુસ્તકો માટે નીચે જણાવેલ જ્ઞાનભંડારોનો વિશેષ સહકાર મળેલ છે. તેના ટ્રસ્ટીગણ અને કાર્યકરોના અમો આભારી છીએ.

(૧) વિજયરામચન્દ્રસૂરીશ્વરજી આરાધના ભવન
ગોપીપુરા-સુરત

(૨) વિજય દાનસૂરીશ્વરજી જૈન જ્ઞાનભંડાર
ચંદનબાળા- મુંબઈ-૭

(૩) શ્રી રત્નત્રયી આરાધના ભવન - પાલડી - અમદાવાદ

(૪) શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર - કોબા - અમદાવાદ

(૫) શ્રી ગીતાર્થ ગંગા- પાલડી - અમદાવાદ

(૬) શ્રી નેમિ-નંદન શતાબ્દિ ટ્રસ્ટ - પાલડી-અમદાવાદ

(૭) શ્રી શ્રુતઆનંદ ટ્રસ્ટ -પાલડી - અમદાવાદ

(૮) આ.શ્રી ૐકારસૂરિ જ્ઞાનમંદિર - સુરત

(૯) શ્રી હરિભદ્રસૂરિ શાસ્ત્રસંગ્રહ - સુરત

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દૃષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका



| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १ | ॐ नमः पार्श्वनाथाय, विश्व- | | १ |
| २ | ॐ नमः परमानन्द-निधानाय | पू.उपा.श्री विनयविजय | १ |
| ३ | नमस्तुभ्यं जगन्नाथ ! सनाथाय | पू.मु. श्री हेमविजयगणि | २ |
| ४ | जय धर्मधुराधीर ! जन्तुजात- | पू.मु. श्री हेमविजयगणि | २ |
| ५ | नमः संसारनिस्तारपथतमः | पू.मु. श्री हेमविजयगणि | ३ |
| ६ | क्षेत्रे योजनमात्रेऽपि नृतिर्यग- | पू.मु. श्री हेमविजयगणि | ४ |
| ७ | हा ! नाथ ! नाथ ! संसार- | पू.मु. श्री हेमविजयगणि | ६ |
| ८ | जीरापल्लीस्थानास्थानस्वा- | मुनिप्रवरश्री धर्महंसगणि | ७ |
| ९ | विश्वानन्दसुखोदयाय महिमा | मुनिप्रवर श्री विनयहंसगणि | १० |
| १० | सर्वानन्दजयश्रियां वरवदः | मुनिप्रवरश्री विनयहंसगणि | १३ |
| ११ | श्रेयः श्रीपदसम्पदोज्ज्वल- | मुनिप्रवरश्री विनयहंसगणि | १५ |
| १२ | यः सार्वज्ञमतव्रतैकमनसां | मुनिप्रवर श्री विनयहंसगणि | १७ |
| १३ | यः स्वामित्वपदोचितस्त्रि- | मुनिप्रवरश्री विनयहंसगणि | २१ |
| १४ | यन्मूर्तेः श्रितसन्निधेर्विधिविदः | मुनिप्रवर श्री विनयहंसगणि | २४ |
| १५ | दानैः पूर्ण इहापरः सुरमणि- | मुनिप्रवरश्री विनयहंसगणि | २६ |
| १६ | सप्तद्वीपरमाश्रिता इव जगद्दा- | मुनिप्रवरश्री विनयहंसगणि | २९ |
| १७ | श्रीशङ्खेश्वरमण्डनहीरं, नील- | पू.उपा. श्री समयसुन्दर वि. | ३३ |
| १८ | अस्त्युत्तरस्यां दिशि देवतात्मा, | पू.उपा. श्री समयसुन्दर वि. | ३४ |
| १९ | उपोपेत तपो लक्ष्म्या, उदु- | पू.उपा. श्री समयसुन्दर वि. | ३५ |
| २० | विज्ञान-विज्ञा न नुवन्ति के | पू.उपा.श्री समयसुन्दर वि. | ३६ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| २१ | प्रणत मानव मानव-मानवं, | पू.उपा. श्री समयसुन्दर वि. | ३७ |
| २२ | त्वद्धामण्डलभास्करे स्फुटतरे | पू.उपा.श्री समयसुन्दर वि. | ३८ |
| २३ | प्रकृत्यापि विना नाथ, विग्रहं | पू.उपा. श्री समयसुन्दर वि. | ४० |
| २४ | पार्श्वप्रभुं केवलभासमानं, | पू.उपा. श्री समयसुन्दर वि. | ४१ |
| २५ | प्रणमामि जिनं कमलासदनं, | पू.उपा. श्री समयसुन्दर वि. | ४३ |
| २६ | कमन-कन्द-निकन्दन-कर्म्मदं, | पू.उपा. श्री समयसुन्दर वि. | ४४ |
| २७ | वन्दामहे वरमतं कृत-सात- | पू.उपा. श्री समयसुन्दर वि. | ४६ |
| २८ | वृषभ धुरन्धर उद्योतन वर, | पू.उपा. श्री समयसुन्दर वि. | ४८ |
| २९ | भलूं आज भेट्युं प्रभो: पाद- | पू.उपा. श्री समयसुन्दर वि. | ५० |
| ३० | लसण्णाण-विन्नाण-सन्नाण- | पू.उपा. श्री समयसुन्दर वि. | ५१ |
| ३१ | अनन्तविज्ञानमपास्तदोषं | पू.उपा.श्री यशोविजयजी | ५३ |
| ३२ | ऐँकाररूपां प्रणिपत्य वाचं, | पू.उपा.श्री यशोविजयजी | ६८ |
| ३३ | ऐँकाररूपस्मरणोपनीतां, | पू.उपा.श्री यशोविजयजी | ७२ |
| ३४ | स्मर: स्मारं स्मारं भवदव- | पू.उपा.श्री यशोविजयजी | ८४ |
| ३५ | ऐन्द्रमौलिमणिदीधितिमाला- | पू.उपा.श्री यशोविजय | ९७ |
| ३६ | कल्पद्रुमोऽद्य फलितो लेभे | पू.उपा.श्री यशोविजय | ९९ |
| ३७ | प्रणम्य परमानन्दं, शान्तिरस- | पू.पं. श्री भावविजय | १०० |
| ३८ | सकलकमलकलकलकरचरण ! | पू.मु.श्री कीर्तिमेरुविजय | ११३ |
| ३९ | जनवनवनधर ! धरणघर् ! | | ११५ |
| ४० | भवदवलवनवतमजलद, सम- | | ११५ |
| ४१ | वरसं वरसं वरसं वरसं, भवदं | पू.मु.श्री शिवसुंदर | ११७ |
| ४२ | प्रणमति य: श्रीगोडीपार्श्वं | पू.मु.श्री धर्मवर्द्धन वि. | ११८ |
| ४३ | प्रणमदिन्द्रशिरोमणिरुग्भरो- | पू.मु.श्री कल्याणचन्द्र | १२० |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ४४ | "चउक्कसायपडिमल्लुइमूरण | पू.आ.श्री भद्रबाहुस्वामि | १२५ |
| ४५ | जय तिहुअणवरकप्परुक्ख ! | पू.आ.श्री अभयदेवसूरि | १२५ |
| ४६ | लच्छीलीलाभवणं थंभणय- | पू. आ. श्री देवभद्रसूरि | १३१ |
| ४७ | नीलुप्पलइहदेहो, फणिंदफण- | पू.आ.श्री महेंद्रसूरि | १३३ |
| ४८ | नवहत्थं नीलाहं वामंगज- | पू.आ. श्री धर्मघोषसूरि | १३४ |
| ४९ | जय जय जिणिंद ! तिअसिंद- | पू.आ.श्री धर्मघोषसूरि | १३५ |
| ५० | मम हरउ जरं मम हरउ विझरं | पू.आ.श्री जिनदत्तसूरि | १३६ |
| ५१ | सयलाहिवाहिजलहर, समूह- | पू.आ.श्री जिनप्रभसूरि | १३६ |
| ५२ | दोसावहारदक्खो नालीयायर- | पू.आ. श्री जिनप्रभसूरि | १३८ |
| ५३ | जय जय जगनायग सिव- | पू.आ.श्री जिनप्रभसूरि | १३९ |
| ५४ | असमसरणीय जओ निरंतरा- | पू.आ.श्री जिनप्रभसूरि | १४० |
| ५५ | नमिरासुरसुरविलसिरसिर- | पू.आ. श्री जिनवल्लभसूरि | १४१ |
| ५६ | गुणमणिनिहिणो जस्सुवरि | पू.आ.श्री जिनवल्लभसूरि | १४३ |
| ५७ | सिरिभवणथंभणपुरे, सुरेहि | पू.आ.श्री जिनवल्लभसूरि | १४५ |
| ५८ | जय सिरिपासजिणिंदचंद | पू.आ.श्री देवसुन्दरसूरि | १४६ |
| ५९ | नमिऊण पासनाहं विसहर- | पू.आ. श्री रत्नकीर्तिसूरि | १५१ |
| ६० | मंगलवरतरुकंदं सुहभाव- | पू.आ.श्री रत्नसिंहसूरि | १५१ |
| ६१ | सिरिपास ! तिजयसुंदर ! | पू.आ.श्री रत्नसिंहसूरि | १५३ |
| ६२ | जय जय पास ! सुहायर ! | पू.आ.श्री रत्नसिंहसूरि | १५४ |
| ६३ | सिरि संखेसर संठिय ! | पू.आ.श्री रत्नसिंहसूरि | १५६ |
| ६४ | जस्स फणिंदफणोहो सोहइ | पू. आ. श्री कमलप्रभसूरि | १५७ |
| ६५ | चिंतामणिपासजिणं, तं नमह | पू. महो. श्री जयसागर | १५८ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ६६ | जय जोगिंदमुणिंदचंद- | पू.मु.श्री जसविजयजीगणि | १५९ |
| ६७ | परमपासपहू महिमालयं, जस | पू.मु.श्री समयसुन्दरगणि | १६४ |
| ६८ | नमिरसुरासुरखयररायकिन्नर- | पू.उपा.श्री समयसुन्दर वि. | १६५ |
| ६९ | मणुयातिसय तिडुत्तर (३०३), | पू.उपा.श्री समयसुन्दर वि. | १६८ |
| ७० | जय तेजलपुरविहितवास !, | पू.मु.श्री कीर्तिमेरु वि. | १६८ |
| ७१ | सिरिधरणिंद सुरिंदविंद भत्ति- | पू.आ.श्री लक्ष्मीसागरसूरि | १७० |
| ७२ | भवभयवणगणदहणं दरिद्द- | श्री नेमिचन्द्र भंडारी | १७४ |
| ७३ | मंगललीलया मेहु जीराउली, | | १७५ |
| ७४ | पणयजणणप्पसंकप्पकप्पद्दुमं, | | १७६ |
| ७५ | सुरनरकिन्नरपणयं कमठासुर- | | १८० |
| ७६ | अमरतरुकामधेणु, चिंता- | | १८२ |
| ७७ | चित्तबहुलाइ चविओ, पाणइ- | | १८३ |
| ७८ | तं नमह पासनाहं, धरणिंद- | | १८३ |
| ७९ | ॐ नमो तुह दंसणेण सामिय | | १८४ |
| ८० | परमिट्ठ मंतसारं, सारं तिल्लुक्क | | १८४ |
| ८१ | ॐ सिरि चिन्तामणिपासं, | | १८५ |
| ८२ | अरिहं थुणामि पासं लच्छि- | | १८६ |
| ८३ | सुरअसुरखयरकिन्नरजोईस- | | १८७ |
| ८४ | पणमामि तिहुयणेक्कल्लधीर ! | | १९४ |
| ८५ | पणमामि मुक्कसंसारवास- | | १९५ |
| ८६ | पासजिणिंदं वंदिय तस्सइ | पू.आ.श्री जयशेखरसूरि | १९७ |
| ८७ | ते धन्नपुन्नसुकयत्थनरा, जे | पू.आ. श्री जिनप्रभसूरि | १९८ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ८८ | जय जय संखेसर तिलय देव, | पू.आ.श्री रत्नसिंहसूरि | १९९ |
| ८९ | संखेसरि पुरि संठियह, | पू.आ.श्री रत्नसिंहसूरि | २०१ |
| ९० | संखपुरे सिरि वंदहु देउ, जो | पू.आ.श्री रत्नसिंहसूरि | २०२ |
| ९१ | जय जय जगगुरु जय जय | पू. आचार्यश्री जयसागरसूरि | २०३ |
| ९२ | देवलवाडए पुरि परमेसरो, | पू.मु. श्री साधुनन्दनोपाध्याय | २०४ |
| ९३ | महानंदकल्लाणवल्लीवसंतो, | पू.मु. श्री विजयतिलकउपाध्याय | २०५ |
| ९४ | कोइलकलकंठिय विविहनारि, | पू. उपाध्यायश्री गुणरत्नगणि | २०७ |
| ९५ | मुझ मनि लागओ एह ऊमा- | पू. उपाध्यायश्री गुणरत्नगणि | २०८ |
| ९६ | नव नव मंगल केलि वधारइ, | पू. उपाध्यायश्री गुणरत्नगणि | २०९ |
| ९७ | वरकाणइ जाणइ जग सहू ए, | पू.मु. श्री सोमकुञ्जरगणि | २१० |
| ९८ | जसु सासणदेविवएसि कया- | पू.मु. श्री पूर्णकलशगणि | २१२ |
| ९९ | तिहुयणजणमणमोरगणरंजण, | | २१८ |
| १०० | जीराउलि राउल कय निवास, | | २२० |
| १०१ | सिरि-पास-जिनेसर तुब्भ नमो | | २२६ |
| १०२ | विषम संसारसरता रतारूयवरं | | २२७ |
| १०३ | थंभणपुरि सिरि पासजिणिंदो, | | २२८ |
| १०४ | श्री सेढी तट मेरू धाम, | | २३० |
| १०५ | नमिय सुरासुर कोडी छोडीय | | २३० |
| १०६ | पासह समरण जो करइ, | | २३१ |
| १०७ | सकल मूरति सामी थंभणओ | | २३२ |
| १०८ | फलवद्धीपुरि पास जुहारीयइ, | | २३३ |
| १०९ | अज्जु सफल अवतार असाड़ा, | पू.मु.श्री धर्मवर्द्धनगणि | २३५ |

## १. ॥ श्रीपार्श्वनाथचैत्यवन्दनम् ॥

(अनुष्टुप्)

ॐ नमः पार्श्वनाथाय, विश्व-चिन्तामणीयते ।
ह्रीँ धरणेन्द्र-वैरोट्या-पद्मादेवी-युतायते ॥ १

शान्ति-तुष्टि-महापुष्टि-धृतिकीर्तिविधायिने ! ।
ॐ ह्रीँ द्विड्-व्याल वेताल-सर्वाधिव्याधिनाशिने ॥ २

जया जिताख्या विजयाख्याऽपराजितयान्वितः ।
दिशां पालैर्ग्रहैर्यक्षै विद्यादेवीभिरन्वितः ॥ ३

ॐ असिआउसा नमस्-तत्र त्रैलोक्यनाथताम् ।
चतुःषष्टि-सुरेन्द्रास्ते, भासन्ते छत्र-चामरैः ॥ ४

श्रीशङ्खेश्वरमण्डनपार्श्वजिन ! प्रणतकल्पतरुकल्प ।
चूरय दुष्टव्रातं, पूरय मे वाञ्छितं नाथ ! ॥ ५

पू.उपा.श्री विनयविजयगणिविरचितम्

## २. ॥ श्रीपार्श्वनाथजिनचैत्यवन्दनम् ॥

(अनुष्टुप्)

ॐ नमः परमानन्द-निधानाय महस्विने ।
शङ्खेश्वरपुरोत्तंस-पार्श्वनाथाय तायिने ॥ १

पिपर्ति सर्वदा सर्वकामितानि स्मृतोऽपि यः ।
स कल्पद्रुमजित्पार्श्वो भूयात्प्राणिप्रियङ्करः ॥ २

पार्श्वक्रमनखाः पान्तु, दीप्रदीपाङ्कुरश्रियः ।
प्लुष्टप्रत्यूहशलभाः सर्वभावावभासिनः ॥ ३

पू.मु.श्री हेमविजयगणिप्रणीतपार्श्वनाथचरित्रादुद्धृतानि

# ३. ॥ चैत्यवन्दनानि ॥

(१) (अनुष्टुप्) [तुर्यसर्गात्]

नमस्तुभ्यं जगन्नाथ ! सनाथाय यशः श्रिया ।
सनाथीकृतसकललोकाय लोकहेलये ॥ १

शीतांशुनेव भुवनं भरतं निखिलं त्वदः ।
पवित्रितं त्वया स्वामिन्नवतारं प्रकुर्वता ॥ २

चिरञ्जीव जगज्जीवजीवातो ! त्रिजगद्गुरो ! ।
अश्वसेनकुलाकाशविकाशननभोमणे ! ॥ ३

वासरोऽप्येष निःशेषवासराणां शिरोमणिः ।
जनता जनितानन्दा जनिर्यत्र तवाऽजनि ॥ ४

नरकोटीर ! कोटीरमिवाज्ञां प्राप्य तावकीम् ।
द्रक्ष्यतेऽध्वाऽखिलैर्लोकैः सदीपैरिव निर्वृतैः ॥ ५

पारावारमिवापारसंसारमुत्तरिष्यति ।
यानपात्रमिव प्राप्य त्वां जनः सकलोऽपि हि ॥ ६

(जन्मकल्याणकाऽवसरे शक्रसदसि शक्रेणोद्गता स्तवना)

४. (२) (अनुष्टुप्) (तुरीयात् सर्गात्)

जय धर्मधुराधीर ! जन्तुजातपितामह ! ।
त्रिभिर्मत्यादिभिर्ज्ञानैः सहजैस्समलङ्कृत ! ॥ १

दीप्रदीपेनेव वेश्म विधुनेव नभःस्थलम् ।
त्वया नाथाऽवतीर्णेन शुशुभे भुवनत्रयम् ॥ २

विश्वदृक्पावनीकारे दृष्टे त्वन्मुखभास्करे ।
दुरन्तैर्दुरितैर्दूरे नष्टं ध्वान्तभरैरिव ॥ ३

भरतक्षेत्रभूरेषाऽभिवन्द्या द्युसदामपि ।
यां करिष्यसि नाथ ! त्वं पवित्रां पादपांशुभिः ॥ ४

धन्यास्ते कृतपुण्यास्ते मानवा मानवाधिप ! ।
यच्चक्षुर्गोचरो भावी त्वं नित्यं भानुमानिव ॥ ५

मुक्तिसीमन्तिनीकान्त ! कज्जलश्यामलच्छवे !।
त्वामेव शरणीकुर्वे नीरं मरुपुमानिव ॥ ६

विश्वविश्वोपकारैकमल्ल ! मल्लोचनातिथिम् ।
त्वामेष मम पौलोमीवर्गो नमति साम्प्रतम् ॥ ७

[जन्माभिषेकसमये मेरोरुपरि शक्रकृता स्तवनेयम्)

५. (३) (अनुष्टुप्) (पञ्चमात् सर्गात्)

नमः संसारनिस्तारपथतमः प्रदीपक ! ।
त्रसानां स्थावराणाञ्च जन्तूनां जनकाय ते ॥ १

श्वभ्राद्यदभ्रदुःखानां बीजमप्रत्ययाऽऽस्पदम् ।
मृषावादं त्यक्तवते तुभ्यं भगवते नमः ॥ २

अदत्तं दुःखप्रबलं शम्बलं नरकाऽध्वनः ।
अनादत्तवते तुभ्यं नमोऽस्तु त्रिजगत्पते ! ॥ ३

अतथ्यपथपथिकमन्मथोन्माथकारिणे ।
अखण्डितब्रह्मचर्यचर्याचर्याय ते नमः ॥ ४

धनधान्यादिं नवधा परिग्रहं भवग्रहम् ।
नित्यं मुक्तवते भूयाद् भूयो भगवते नमः ॥ ५

महाव्रतानां पञ्चानां भारनिर्वाहधूर्वह ! ।
लोकालोकप्रकाशैकभास्वते भवते नमः ॥ ६

समितीः पञ्च पञ्चानां व्रतानां सुस्थितीरिव ।
गुणरत्ननिधानाय बिभ्रते भवते नमः ॥ ७

शुद्धध्यानैकमनसे वचःसंवरधारिणे ।
कायचेष्टां त्यक्तवते नभस्तुभ्यं जगद्गुरो ! ॥ ८

पञ्चस्वपि विषयेषु सुभगाऽसुभगेष्वपि ।
निर्विकल्पमनस्काय तुभ्यं भद्रात्मने नमः ॥ ९

ज्ञान-दर्शन-चारित्ररत्नत्रयश्रियं द्रुतम् ।
लोकोत्तरगुणाधारां तुभ्यं श्रितवते नमः ॥ १०

औदार्य-स्थैर्य-गाम्भीर्य-चातुर्याऽऽदिगुणावलीम् ।
अलङ्कारमिवाऽनर्घ्यं तुभ्यं धृतवते नमः ॥ ११

[दीक्षाकल्याणकावसरे देवेन्द्रोदाहृता स्तवनैषा]

### ६. (४) (अनुष्टुप्) (पञ्चमसर्गाद्)

क्षेत्रे योजनमात्रेऽपि नृतिर्यगमृताऽन्धसाम् ।
यत्तिष्ठेत् कोटिः कोटिस्ते माहात्म्यमिदमद्भुतम् ॥ १

भामण्डलमिदं स्वामिन् ! पश्चाद् मूर्ध्नस्तव व्यभात् ।
वपुष्यमाद्भिरस्वल्पैर्महोभिरिव पिण्डितम् ॥ २

व्यरूचद्रुचिरोचिष्णु दिक्चक्रं त्वत्पुरः प्रभो ! ।
धर्मचक्रं धर्मचक्रिलक्ष्म्याश्चिह्नमिव स्फुटम् ॥ ३

महत्स्वपि महानेकोऽसावेवाऽत्राऽधिदेवतैः ।
त्वत्पुरो विदधे स्वामिन्नयमिन्द्रध्वजो महान् ॥ ४

सत्वरं भगवन् ! भवान् जज्ञे यच्चतुराननः ।
मन्ये चतुर्गतिद्वारकपाटजडताय तत् ॥ ५

उल्लसन्नेष कङ्केल्लिवेल्लत्पल्लवमालितः ।
भवानिव विभो ! केषां चक्षुषां नाऽभवद् मुदे ॥ ६

विभो ! त्वं नीलिमच्छायः स्वर्णसिंहासनस्थितः ।
मेरुलीन इवाम्भोदः सन्मयूरमुदं व्यधाः ॥ ७

वप्रत्रयी मणि-स्वर्ण-रजतैः रचिता प्रभो ! ।
भुवि भूभवनैश्वर्यं प्रोच्चैरियमसूचयत् ॥ ८

छत्रत्रयी भवन्मूर्ध्नि पावर्णेन्दुनिभा व्यभात् ।
ज्ञान-दर्शन-चारित्रत्रयप्राचुर्यसूचिका ॥ ९

परुवच्चामरश्रेणी धवला पार्श्वयोस्तव ।
मुखाम्भोरुहसेवायै मरालालिरिवागता ॥ १०

देवदुन्दुभयो देव ! नन्दन्तो गगनाङ्गणे ।
इत्यभ्यधुरसावेव जेता क्रोधादिवैरिणाम् ॥ ११

गन्धाम्बुवर्षणं हर्षात् तेनिरे त्वत्पुरः सुराः ।
सिञ्चन्त इव बोधिद्रुमुच्चैः पदफलासये ॥ १२

पञ्चवर्णा पुष्पपङ्क्तिर्न्यपतद् भवतः पुरः ।
त्यक्तैव पञ्चबाणेन बाणालिः त्रासमीयुषा ॥ १३

ये नृतिर्यक्सुरा गाढारूढमत्सरिणो मिथः ।
त्वत्सङ्गात् सुहृदायन्ते ते परस्परवत्सलाः ॥ १४

केश–श्मश्रु–नखा यन्नो वृद्धिं यान्ति विभो ! तव ।
आप्तो नाऽऽप्तैः परैरेष एतावान् महिमा भुवि ॥ १५

अनुकूलेन्द्रियार्थं त्वामृतवो युगपत् समे ।
भेजुः षड्जीवनिकाया इव प्राणात् सतुष्टयः ॥ १६

एतैरतिशयैस्तारैस्ताराभिरिव चन्द्रमाः ।
कलितः प्रभो ! न कस्य दृक्चकोरमुदे भवेः ॥ १७

नमस्ते ज्ञानविज्ञानप्रज्ञाप्राग्भारशोभिने ।
जगच्चित्तचमत्कारिसर्वातिशयशालिने ॥ १८

[प्रभोः प्रथमदेशनाऽवसरे पित्रा कृता स्तवनेयम्]

## ७. (५) (अनुष्टुप्) (षष्ठात् सर्गात्)

हा ! नाथ ! नाथ ! संसारसरिन्नाथेऽत्र दुस्तरे ।
तारयिष्यति कः सत्त्वांस्त्वां विना सतरण्डकम् ? ॥ १

व्याकुलीकृतनिःशेषलोकमालोकसङ्कुलम् ।
संहरिष्यति को ध्वान्तं त्वां जगच्चक्षुषं विना ? ॥ २

सन्देहध्वान्तसन्दोहव्याप्ते भुवनमन्दिरे ।
विना त्वां दीपकं नाथ ! कः प्रकाशं विधास्यति ? ॥ ३

अद्यैषा त्रिजगल्लोकलोचनभ्रमरावली ।
क्व स्थास्यति निश्चलास्या विना त्वां सरसीरुहम् ॥ ४

स्वामिन्नस्तमिते लोकोद्योते प्रद्योतने त्वयि ।
भ्रमिष्यन्त्यधुना मिथ्यामतखद्योतपोतकाः ॥ ५

त्वद्विहारे महापाते निर्वाते वारिताऽशिवे ।
इति कादम्बिनी लोकं प्रभविष्यति सम्प्रति ॥ ६

स्थास्यामि कस्य पुरतः कुड्मलीकृतपाणिकः ? ।
कस्याज्ञां च निधास्यामि दामेव निजमूर्धनि ? ॥ ७

[निर्वाणाऽवसरे देवेन्द्रोदीरिता स्तवनेयम्]

मुनिप्रवरश्री विनयहंसगणिविरचितम्

## ८. ॥ श्रीजीरापल्लीमण्डन-श्रीपार्श्वजिनेश्वरस्तोत्रम् ॥

(कामक्रीडा)

जीरापल्लीस्थानास्थानस्वाख्याख्यातिप्रख्यानं,
बुद्धध्येया देयामेयज्योतीरूपा तारूपम् ।
पिष्टानिष्टं सृष्टाभीष्टं पुष्टाकृष्टश्रीसृष्टिं,
पार्श्वोपास्यं श्रीपार्श्वेशं विश्वाधीशं सेवेऽहम् ॥ १

यस्या दानं नाम्नः सर्वस्थामस्थानं भव्यानां,
स्थाने स्थाने नित्यानन्दश्रीसन्दोहं यद्दत्ते ।
भोगाभोगं योग्यारोग्यं सत्सौभाग्यं तत्स्थाने,
स श्रीजीरापल्लीपार्श्वस्तत्तत्सिद्धौ यज्जाग्रन् ॥ २

कासश्वासाः पुष्टाः कुष्ठा दुष्टाटोपाश्च स्फोटा,
नष्टानिष्टव्यापा आमाश्चान्ये पिष्टाः किं न स्युः ।

यन्माहात्म्यैर्भव्यावल्याः पोषाः सौख्येऽसङ्ख्येयाः,
यत्तद्युक्तं येन स्वामी विश्वेष्टानीष्टे कर्त्तुम् ॥ ३

पाथश्चौरव्यालाग्नीभाऽदभ्रामित्रेभारीणां,
क्वाप्याशङ्का शङ्काप्यास्ते तस्यावश्यं किञ्चित्ते ।
यः श्रीपार्श्वध्यानध्यायी धीशुद्धः स्यात्तत्सत्यं,
यत्सर्वात्मत्राता नेता धुर्यः सैकस्त्रैलोक्ये ॥ ४

व्याख्यामः किं तेऽन्यद्यत्त्वन्नामस्मृत्याप्यस्मर्या-,
र्यार्य स्मर्याः श्लोका लोकाश्चर्याकार्यावर्याभाः ।
सर्वत्रौजः स्फूर्जत्तेजो जय्यैश्वर्यं स्यात् शश्वत्,
पार्श्वस्वामिंश्चित्रं तत् किं यत्त्वं ध्यातः सुश्रीदः ॥ ५

अष्टौ स्पष्टाः सिद्ध्युल्लासाः प्राकाम्याद्याः स्युः शम्भौ,
सा मूढोक्तिर्व्यक्तिस्त्वेषा त्वत्पादाब्जस्थध्याने ।
पार्श्वावश्यं वश्यास्तेऽमी वासा बद्धा नो चेत् किं,
स्थाने स्थाने त्वद्भक्तानां युक्त्या युक्ता लक्ष्यास्ते ॥ ६

कीर्त्तिस्फूर्त्तिर्मूर्त्तिश्चक्रे धात्रा शुद्धद्रव्यैर्यो,
नेतस्ते तान्यानन्दश्रीरूपाणीवासन्मन्ये ।
किं चासौख्याद्वैतस्फूर्जद्राज्यप्राज्योर्जाणीव,
स्पष्टं चैतत् स्पृष्टेष्टासौ नो किं दृष्टा प्रत्यङ्गम् ॥ ७

पादोपास्तिं शस्तानन्तैश्वर्यो जृम्भत्खानिं ते,
भव्यैर्भोग्या भोग्योपायां ह्रीणाः पार्श्वं प्रेक्ष्याथो ।
कल्पाद्यास्ते किञ्चिद्दत्वं ज्ञात्वा स्वस्मिन् मेर्वादौ,
नेशुर्भेजुस्तेनेवामी कालेऽलक्ष्यत्वं ह्यस्मिन् ॥ ८

त्वन्माहात्म्यं पार्श्व ! ब्रूमः कोट्या वाचा किं यस्मात्,
नृत्येत्पङ्गुः पद्भ्यां दृग्भ्यां पश्येदन्धः सद्राज्यम् ।
भुङ्क्ते दुःस्थावस्थः सुस्थः पुत्रैर्वन्ध्योऽवन्ध्यः स्यात्,
निःस्वः सुस्वः पूज्योपाख्यो मित्रन्त्येतेऽमित्राद्याः ॥ ९

पादद्वन्द्वं विश्वेशानं सर्वैश्वर्यं पाणिश्री,-
र्लक्ष्मी कक्षी कर्त्रीशात्मा वक्षः पक्षः सुब्रह्मा ।
इत्यात्माङ्गं नानादेवाध्यात्म्यं धत्ते यत् पार्श्व,-
स्तत् किं मन्ये दातुं शश्वत्सम्पद्भोगं भक्तानाम् ॥ १०

श्रीपार्श्वोच्चैर्मौलौ लक्ष्या नामूः फण्यः श्रेण्यः स्युः
किन्तु क्रीडावासाः सप्तद्वीपश्रीणां सुक्रीडाः ।
भक्त्याऽऽसक्त्या यं वा रक्तानां नैवं चेत्तत् कस्मा,-
दर्हन्नाम ध्यानस्थानां क्रीडन्त्येताः संस्ताये ॥ ११

पार्श्वेश ! त्वं शश्वत् सम्पद्दोऽसीत्येतां स्वख्यातिं,
धत्सेऽस्म्यर्थी स्वेष्टस्पृष्टावेषोऽहं तु त्वन्नाथः ।
तेनानेहः क्षेपापायं विश्वैश्वर्यं मे कुर्या,
यस्मात् स्वामी विश्वाधारः किं नो दत्ते भक्तेष्टम् ॥ १२

अन्ये देवा देवाभासा हेत्वाभासा यद्वन्नो,
साध्यायालं मानाध्यक्षानध्यक्षाभ्यां त्रैलोक्ये ।
यस्माज्जीरापल्लीपार्श्वः पक्षे जीवे सन्मोक्षं,
साध्यं साध्यत्येते नैषः सत्यो हेतुः सत्सिद्धौ ॥ १३

स्वःकुम्भद्भूचिन्तारत्नं द्यो धेनुर्वा त्वन्नाम्नि,
स्थास्नूपाख्येत्येतत्सत्यं विश्वस्वामिन् यल्लोके ।

अर्हद्गोत्रं सत्यं मन्त्रं यन्त्रं तन्त्रं बिभ्राणा,-
श्चित्ते भक्ताः किं किं प्रापुर्नेहाहार्यायैश्वर्यम् ॥ १४

पार्श्वोपास्यस्फूर्जत्पार्श्वः श्रीपार्श्वार्त्तैर्हन्त्री ते,
मूर्त्तिस्फूर्त्तिर्दृष्टाभीष्टश्रेण्यैकस्यास्या न स्यात् ।
सौभाग्यश्रीभाग्यारोग्याभङ्गाभोगोद्यद्भोगा,-
स्वादा मन्दामोदोदारश्रेयःसौख्याख्येयायै ॥ १५

इत्थं श्रीगुरुपूज्यहर्षविनयश्रीसूरिह त्वं स्तुतो,
जीरापल्ल्यभिधाभिधेयमहिमामेयश्रिया संश्रितः ।
नित्यानन्दमहोदयोदितपदप्रष्टप्रथां देहि मे,
शर्मश्रीनिधिधर्महंस सरसीं श्रीपार्श्वविश्वेश्वर ! ॥ १६

मुनिप्रवर श्री विनयहंसगणिविरचितम्

## ९. ॥ श्रीजीरापल्लीयपार्श्वनाथस्तोत्रम् ॥

(शार्दूलविक्रीडित)

विश्वानन्दसुखोदयाय महिमा यस्योदगात्सर्वत-
स्त्रैलोक्येऽपि नवीनभानुवदिवाधातुं प्रतिज्ञां निजाम् ।
भक्तप्राण्यखिलेहितार्पणतया भाव्यं मयेत्यादृताम्
जीरापल्ल्यधिवासवासितनवस्वाख्यः स पार्श्वः श्रिये ॥ १

त्वद्ध्यानप्रभवप्रभावविभया सर्वाङ्गसङ्गिक्षय-
श्वासस्फोटककासकुष्ठखसजाऽसाध्याधिबाध्याङ्गगाः ।
शोच्यास्तेऽपि भवन्त्यभङ्गविभुताऽऽरोग्यातिभाग्याद्भुता,-
स्वादाः साम्प्रतमत्र तत्सुखनिधिर्यत्त्वं प्रभो ! प्राणिनाम् ॥ २

मानामेयकुवातवातलहरीरङ्गत्तरङ्गक्षरत्,-
क्षुब्धक्षोणिधराहतिस्थपुटिते मग्ना इवाब्धाविमे ।
बोहित्थस्थितयः स्वयं स्युरभयाभव्याभवन्नामस,-
न्मन्त्रैः पार्श्व ! तवोचितं समभयातीतात्मकस्त्वं यतः ॥ ३

कल्पान्तोद्धतवह्निवत्प्रसृमरज्वालावलीढावनी(?)
भावः सर्वमिवाजिघत्सुरभितः श्रीपार्श्वदावानलः ।
जीरापल्ल्यधिपाऽमृतायत इह त्वद्ध्यानलीनात्मनाम्
किं चित्रं यदशेषतापशमनं सत्यं त्वमेवामृतम् ॥ ४

क्रोधाध्माततयापतत्फणिपतिर्दन्दश्यमानाशया
शोणाक्ष्णेव दिदंशिषुर्जगदिदं हालाहलैः स्वैः स्वयम् ।
त्वद्भक्त्यैव तनूसतां सुमनसां मालायते सार्व यत्
तत्स्थाने त्वदुपासनामितफलं दत्ते न किं यत्सुखम् ॥ ५

नो विघ्नस्तव पार्श्व ! सेह महिमा कीदृक् किमेषौषधी
भीभेत्री भविनां सुलब्धिलहरी किं तेजसां वा निधिः ।
किं विश्वेष्टदवल्लरीति कलनां पाटच्चराराः तयः
सर्वस्वापहृतोऽपि यद्धितहृदो मित्रन्त्यहो यद्वशात् ॥ ६

नेतर्नाद्भुतमेतदत्र यदमी पुच्छच्छटाच्छोटनै,-
र्मत्तेभादिमदज्वरप्रशमिनः पारीन्द्रका द्वीपिनः ।
अन्येऽपीदृशराशयः शमरसैः शान्तास्त्वयीशे स्थिते
भव्यानां हृदि यच्छमोदयमयस्तत्त्वप्रभुस्त्वं भुवि ॥ ७

मातुः स्वप्नदशासु चेच्छुभतयाऽभूवं त्वयीशाऽऽगते
गर्भेऽथादृतसत्पथस्थितिमिमां भुञ्जीय भक्तेऽपि ते ।

स्वाङ्गीकारमितीव वोढुमसमस्थामोत्सुकः स्वक्रुधा
भेत्तुं विश्वमपि द्विपोऽपि शिवतां तेने भयं नार्हते ॥ ८

दृष्टादृष्टभयं द्विषन्नृपहयोन्मत्तद्विपस्पन्दना,-
ऽरावैर्वीरभुजोर्जितैः प्रतिभयं सङ्ख्यातिगं सङ्ख्यगम् ।
तेषां षाट्कुरुते न किन्तु विजितं सत्तज्जयश्रीकरं
येषां चेतसि पार्श्वविश्वभयभित्त्वं सिद्धिदः संवसेः ॥ ९

रोगाद्याधिशमः समाधिविधयः सल्लब्धिधीसिद्धयो
विश्वैश्वर्यमहार्यधैर्यसुयशःश्लाघानघं स्वात्मसात् ।
स्थानस्थाननिधिः प्रतापपरतेत्याज्ञाजुषां किं न ते
जीरापल्ल्यभिधाभिधेयभगवन्माहात्म्यतः सर्वतः ॥ १०

स्वोपास्यैः सुकृतैः कृतायतिशया वेदाग्नयो वाग्गुणाः
पञ्चत्रिंशदनिन्द्यदानलहरीज्ञानादिकं तारकम् ।
प्राकारत्रिकमङ्गिमोदकमिति श्रेयोमयोभूर्यतः
स्वामिन्नादित एव मद्रनिधयस्तेनेव किं ते श्रिताः ॥ ११

प्राचीनेषु भवेष्विहापि च जयश्रीकारमभ्यासिता,-
भ्यस्ताङ्ग ! व्यतनोरतीव विविधोपायप्रपञ्चैर्द्विधा ।
स्वात्मन्याश्रितभावुकेषु च विभो ! भव्याजयश्रीपदा,-
त्मानं त्वत्पदसेवितस्तत इवाभूवन्नवश्यं किमु ॥ १२

एवं श्रीगुरुराजहर्षविनयश्रीसूरिपूज्यश्रियम्
नीतं स्तोत्रपथं भवन्तमसकृत् याचे विधिं बोधिजम् ।
सौख्यासङ्ख्यविशेषपोषमहिमं श्लोकप्रकाशाद्भुतम्
श्रीपार्श्वाधिपधर्महंससरसाम्भोजं जयश्रीपदम् ॥ १३

मुनिप्रवरश्री विनयहंसगणिविरचितम्

## १०. ॥ श्रीवरकाणकपार्श्वनाथस्तोत्रम् ॥

(शार्दूलविक्रीडित)

सर्वानन्दजयश्रियां वरवदः सर्वत्र सेवाजुषाम्
योऽभूद्वा वरसौख्यवाच्युत महावाक्यप्रकाशो वरम् ।
यस्यासीद्वरकाणकः किमिति सत्ख्यातिस्त्रिधार्थेव तत्
स श्रीपार्श्वविभुः प्रभावविभुताभावाय भूयाद्भुवि ॥ १

यन्माहात्म्यमहोदयैर्हयभयाभावाद्विभूतिप्रभा-
भाजो भव्यतरा भवन्ति भविका भोगप्रभावाद्भुताः ।
दुष्टारिष्टजकष्टकोटिघटनां पिष्ट्वा तथातथ्यशम्
स्थानस्थस्थितयः क्षणात्स्युरशिवं पार्श्वः स वः संस्यतु ॥ २

यन्मौलौ मुकुटः स्फुटं प्रकटितस्त्रैलोक्यरक्षाकरः
प्राकारः किमिवान्यथा कथमयं दुःखोपसर्गान्वयः ।
नश्यत्येतदुदारभक्तिसुहृदां जागर्त्ति सर्वत्र च
श्रीसम्पत्पदवी ददातु स मुदं विद्यामवद्यां विभुः ॥ ३

त्रैलोक्याखिलसौख्यपोषकमभीभावाद्भुतं मे मनाङ्,-
माहात्म्योदयमात्मनः स्वपददस्त्वं देहि दीप्त्यै प्रभो ! ।
इत्यर्केन्दुयुगं निजेहितमिनं याचेत यत्कुण्डला,-
काराङ्गं किमिव श्रुतिस्थितमसौ पार्श्वः श्रिये स्तान् मयि ॥ ४

यद्ध्यानानुभवाद्भवन्ति भविनां सौभाग्यभाग्यप्रभा,-
भोगाभीष्टसुसम्पदोऽपि विपदां नाशः शिवश्री स्वसात् ।

भातीतीव यशःप्रतापमहिमासम्पन्मयं मूर्त्तिमद्
यद्भाले तिलकं किमुज्ज्वलमलं लाभाय स स्तात्प्रभुः ॥ ५

यस्योरःस्थललम्बिहारलतिकाभीष्टैः फलैः किं फल-
त्येषाऽद्यापि नगोलतेव(?)च भुजद्वन्द्वोङ्गदश्रीरपि ।
तद्वद्भक्तिमतां न दृक्पथरता किं किं फलं तन्तनी,-
त्यानन्त्येन किमुत्तमं स जयतु श्रीपार्श्वविश्वेश्वरः ॥ ६

यत्पद्मासनसंस्थितिस्थसुमहःपर्यस्तिकालङ्कृति,-
र्भास्वद्रूपमुखग्रहासुरसुराङ्गाकारदिव्यास्थितिः ।
किं वक्तीव समस्तदैवतमयत्वं सार्वपादाब्जगं
पूज्यत्वं च जगत्त्रयेऽपि तनुतां पार्श्वः स वः सम्पदम् ॥ ७

तत्तल्लक्षणलक्षितांह्रियुगलं यस्योच्चजानूजनु-
र्हीजङ्घोरुकटीकरोदरसुहृद्भ्रूभालवक्त्रादिकम् ।
प्रत्येकं भवभीहरं वरकरं चातः परं किं स्तुवे
माहात्म्यं वरकाणकेति सुयशाः पार्श्वः स नः श्रीपदम् ॥ ८

एवं श्रीवरकाणकं वरकरं श्रीपार्श्वविश्वेश्वरम्
नीत्वा स्तोत्रपथं सहर्षविनयश्रीसूरिसंसद्गुणम् ।
स्वःकुम्भद्रुगवीमणीप्रभृतिसन्माहात्म्यजैत्रोदयम्
याचे श्रीगुरुधर्महंसमहिमं श्रीबोधिरत्नाकरम् ॥ ९

मुनिप्रवरश्री विनयहंसगणिविरचितम्

## ११. ॥ श्रीस्तम्भनपार्श्वदेवस्तोत्रम् ॥

(शार्दूलविक्रीडित)

श्रेयः श्रीपदसम्पदोज्ज्वलकलालीलाविलासालय,-
श्लोकानेकसुखैकपोषचपलीभावं च कर्मोन्नतिम् ।
योऽस्तम्भद्भविनां द्विधैव परितस्तेनेव किं स्तम्भन,-
ख्यातिं प्राप स पार्श्व इष्टफलदः श्रीस्तम्भनः स्तात् सताम् ॥१

यः स्याद्वादमसाधयत् स्वमहिमाऽसाधर्म्यदृष्टान्ततो,-
ऽनन्तार्थेष्वपिनैकधर्मविधिनाऽऽज्ञाराधकान्याङ्गिनाम् ।
श्रेयः श्रीसुखितेतराद्यमिततत्पर्यायतः सन्नयै,-
रादेशोन्नयनैर्जिनः स वृजिनं श्रीस्तम्भनोऽपास्यताम् ॥ २

सप्तद्वीपजयश्रियः किमुदिताः सप्तव्रती किं हया,-
तङ्क्त्यक्तसुखाकराः किमु शमावासैषणाः सप्त किम् ।
द्व्यादेशस्थितसप्तभङ्गसुभगाः सप्ताप्यमी किं नया
दक्षाः प्रेक्ष्य फणावलीमितिमतिं तन्वन्ति तेऽर्हन्निजाम् ॥ ३

नित्योद्द्योतवती महामणिसुवर्णालङ्कृतिज्योतिषा
वर्यैश्वर्यमयप्रभुत्वपदवीसम्पादचिन्तामणिः ।
सर्वांहःशमिनी गुणोद्यदवनी नेत्रामृतस्यन्दिनी
मूर्त्तिः स्तम्भनपार्श्व ! ते न तनुते किं किं सतां शं श्रिता ॥ ४

यस्याम्बा शयनीयपार्श्वसदहिं ध्वान्तेऽप्यपश्यच्च यः
पार्श्वाद्र्धज्वलदग्निदग्धफणिनोऽदादैन्द्रराज्ये तु यः ।
पार्श्वोपासितपार्श्वभाग् भविकदः पार्श्वं च यस्येष्टदं
सान्वर्थाभिधयाऽन्वितः श्रितहितश्रीदः स पार्श्वप्रभुः ॥ ५

यस्यांह्री हयभीभिदौ सिमरमावासौ शयौ हृच्छमा-
मेयौ निर्वृतिनेयरूपसुभुजावास्यं प्रसन्नोज्ज्वलम् ।
नेत्रं विश्वकृपाकरञ्च करणं सारोपकारोत्करं
स्तम्भं स्तम्भनपार्श्व ! पार्श्वमहित ! त्वं मेऽस्य शस्यश्रुतैः ॥ ६

तत्तज्जातिभवावतारविसरक्लेशैरनन्ताणुका-
वृत्त्या पूरणतोऽथ नाथ ! सुपथं प्राप्तं भवच्छासनम् ।
तन्निर्मापय मे तथोत्तममतिं भव्यो भवेयं यथा
याथातथ्यपथस्थबोधिसुयशाः श्रीस्तम्भनार्हन्नहम् ॥ ७

चित्स्वार्थव्यवसायिनी प्रमितिगा नान्येति किं ज्ञापयत्
षट्तर्केष्विव यस्य जानदुभयानन्तात्मकत्वं स्वयम् ।
स्वाधारं च परान्निजज्ञकलया ज्ञानं तथाऽतीतरत्
तत्रानन्तसुखोदयोऽजनि यथा स स्तम्भनेशः श्रिये ॥ ८

यस्य ध्यानमिदं महोरग १ मृगेन्द्रा २ ग्न्या ३ म ४ सङ्ग्राम ५ वा ६
र्दस्यु ७ स्त्येन ८ भयं भिनत्त्यहिभयं चाजन्यजन्मान्वयम् ।
भोगाभोगसुयोगरङ्गगरिमागारर्द्धिवृद्धिप्रथां
दत्ते मेदुरतोदितां च स मुदं दद्याज्जिनः स्तम्भनः ॥ ९

प्रत्यक्षं १ च परोक्ष २ मित्युचिततां मानद्वयस्येव किं
तन्वन्नैकनताङ्गिनामजनि यत्स्पष्टेतराभीष्टदः ।
यन्माहात्म्यगुणस्तदेतदुचितं शक्त्येह सोऽयं यतो,-
ऽनन्तेष्टानि तनोति सन्ततमयं जीयात्प्रभुः स्तम्भनः ॥ १०

देव ! त्वं श्रितवत्सलः कलिमलप्रक्षालनप्रत्यलः
सर्वापत्पददुर्यशःपरभवाऽऽध्यर्त्तिप्रभेदी यतः ।

तेनार्याः प्रणतास्त्वदेकशरणाः स्वामीशमात्मेशताम्
तन्वन्तं श्रयिणामनन्तसुखदां पार्श्वप्रभो ! स्तम्भन ! ॥ ११

बुद्धस्त्वं स्वयमेव शङ्करमयो जिष्णुश्च सर्वात्मना
लक्ष्यस्त्वं परमेष्ठ्यपीष्टपरमैश्वर्यात्मकस्त्वं यतः ।
तेनार्थित्वमितोऽर्थयेऽर्थद ! भवन्तं यन्मयि प्रापया,-
ऽनन्तानन्दपदं यशोमयमिह श्रीस्तम्भन ! त्वं विभो ! ॥ १२

किं लावण्यविशालकेलिलहरी किं ज्ञानशालास्थितिः
किं कारुण्यनिधिः सुधोज्ज्वलकलामालाकृतिः किं किल ।
सम्यग् ब्रह्मरसः किमुत्तममुदा साराकरः किं स्फुरन्-
मूर्त्तिर्दृक्पथमागतेष्टफलदा क्व क्व प्रभो ! स्यान्न ते ॥ १३

एवं सद्यजयश्रिहर्षविनयश्रीसूरिपूज्योन्नता,-
नन्तज्ञानसुदर्शनः स्तुतिपथं नीतः स नः स्तम्भनः ।
श्रीपार्श्वः स्वपदाब्जसेवनरसास्वादप्रदः स्ताद्यतः
सिद्धिश्रीपदधर्महंसलसनं स्याच्चेतसीष्टोदयम् ॥ १४

मुनिप्रवरश्री विनयहंसगणिविरचितम्

## १२. ॥ श्रीस्तम्भनपार्श्वदेवस्तोत्रम् ॥

(शार्दूलविक्रीडित)

यः सार्वज्ञमतव्रतैकमनसां देहेषु गेहेषु वा
श्रीह्रीधीधृतिकीर्त्तिकान्तिसततस्थित्यन्ततास्तम्भनैः ।
सान्वर्थं प्रथयन् स्वनाम भविनां हृद्देश्मवासं व्यधा-
न्नित्यानन्दपदोदयाय सुखदः स स्तम्भनः स्ताज्जिनः ॥ १

कस्तूरीतिलकं त्रिलोकविजयश्रीसम्पदः स्वस्तरु-
श्चिन्तातीतसुखाकरस्य महिमाम्नायस्य दिव्यश्रुतम् ।
विश्वोद्द्योतमहामहो हि विविधाऽऽधिव्याधिधन्वन्तरिः
सोऽस्तु स्वस्तिपदं समस्तजगतां पार्श्वप्रभुः स्तम्भनः ॥ २

देवाभासतया परे हरिहराद्या दोषपोषाकर,-
स्त्रीशस्त्रादिकुदेवलक्षणजुषो दारिद्र्यमुद्रोदिताः ।
ते नष्टाः स्वयमन्यनाशनपरास्तीर्णाः स्वयं तारका,-
स्त्वं देवत्वगुणार्णवस्तु शिवदः सेव्यः सतां सार्व ! सः ॥ ३

दृष्ट्वाऽनन्तगुणात्मकं निजमिनं यं स्पद्र्धयेवाजनि
ज्ञानं दर्शनवीर्यसौख्यमुदितानन्त्यं प्रति स्वक्रियम् ।
यन्माहात्म्यमथो तथैव भविनामद्यापि तेनेव किं
दत्तेऽनन्तचतुष्टयं श्रितवतां सोऽर्हन्मुदे स्तम्भनः ॥ ४

स्वामिंस्त्वं श्रितसर्वदोऽस्म्यहमिति त्वत्ख्यातिमाधाय यत्
त्वां सन्नाथमशिश्रियं कुरु तथा सत्यप्रतिज्ञस्ततः ।
नित्यानन्दपदोदयास्तव पदद्वन्द्वप्रभावैर्यथा
मय्याशु स्युरनन्तसौख्यविषयाः प्रष्ठप्रतिष्ठाद्भुताः ॥ ५

मूर्त्तिस्तम्भनपार्श्व ! पार्श्वमहितालङ्कारसारार्हणा-
ऽरीणां तेऽतिशयातिशायिमहिमां(?) जाग्रद्गुणग्रामणीम् ।
दृष्ट्वाऽदृष्टजदुष्टकष्टकटुकानिष्टप्रपञ्चासुखं
पेषम्पेषमशेषसौख्यपदवीं ते नाश्रयन्ते श्रिताः ॥ ६

यन्माहात्म्यवशेन नृत्यति सपाद् पङ्गुर्वदेद्वादिव-
न्मूकोऽप्युन्नतिमानिवोदितसदानन्दः पठन् कीकटः ।

आम्यारोग्यपदं यशस्व्यपि यशःशून्यः किमत्राद्भुतं
स त्वं स्तम्भनपार्श्व ! कामितकरोऽनन्तार्थचिन्तामणिः ॥ ७

यः पादौ द्युमणीगुणाणुरचनो धत्ते सपुण्योदयैः
शश्वत्स्वस्तरुवारसारदलजौ पाणी गिरं स्वर्गवीम् ।
तत्तत्कामिततीर्थपुद्गलभवं सर्वाङ्गमत्यद्भुतं
स त्वं स्तम्भनपार्श्व ! विश्वसुखभूर्यत्तत्र किं कौतुकम् ॥ ८

त्वद्ध्यानस्थहृदामुदारसरसश्रीसम्पदः स्युः सदा,-
ह्लादाली तु पदे पदेऽधिपतिता सौभाग्यभाग्यप्रभाः ।
आरोग्याभ्युदयोऽत्र यत्तदुचितं विश्वेऽपि येन स्वयम्
सर्वैश्वर्यविधानशक्तिविभुताभोक्ता त्वमेव प्रभो ! ॥ ९

स्वामिंस्त्वद्वचनामृतानुभविनां भव्यात्मनां दुर्दशाम्
मा कुर्वन्तु कदाप्यदृष्टविकटाटोपाः परीपाकिनः ।
क्रोधाध्माततयेत्युदीर्य हृदि तन्मूलेऽद्य दग्धौ निजम्
सप्तार्चिर्ज्वलदर्चिरालिमिव किं तेने स्फटोपाधिना ॥ १०

तत्तज्जातिजरामृतिप्रभृतिका दुःखप्रकर्षाः पय-
श्चञ्चद्वीचिचयाश्च तैरतितरां भीमो भवाब्धिर्भवेत् ।
तत्र स्तम्भनपार्श्वविश्वपवपुर्बोहित्थमुत्तारकम्
नो चेदभ्रिपरम्पराऽस्त्यथ कथं लक्ष्या स्फटच्छद्मना ॥ ११

शश्वत्स्तम्भनपार्श्वविश्वपपुरे वासं व्यधुः सद्विधिम्
न्यक्षक्षायिकदर्शनैकचरणज्ञानादिकोच्चश्रियः ।
तास्तास्तत्र ततश्चकास्ति किमिव क्रीडारसप्राप्तये
सौभाग्योन्नतमण्डपः प्रकटितस्तासां स्फटव्याजतः ॥ १२

सप्तद्वीपभुवां द्विधापि विपुला लक्ष्म्यः प्रभुस्तम्भनम्
सम्भूयोचितसौववाससुपदं मत्वेव किं शिश्रियुः ।
नो चेदत्र कथं मिथः स्वसरसप्रीत्युन्नतिप्राप्तये
मैत्र्यङ्गुल्य इमाः स्फुटं स्फटमिषाल्लक्ष्या अमूषां खलु ॥ १३

क्रीडन्तीव मुखोत्कराः किमु शमास्वादा इव स्युः किमु
ज्ञानानन्दपदानि किं प्रसृमरज्योतिर्जटामण्डपाः ।
किं लावण्यविशालकेलिरिव किं किं विश्वशोभाकरा
इत्युत्प्रेक्षकधीधनाः प्रभुफणान्प्रेक्ष्य स्युरुज्जृम्भकाः ॥ १४

ईशोऽलक्ष्यगुणः शुचिर्गणपतिः स्वामी सदा सद्विधि-
र्विश्वे जिष्णुरनेकदैवतमयत्वेनैव वन्द्योऽखिलैः ।
नाथ ! त्वं प्रणुतोऽपि सद्गुणगणैरिष्टार्थसम्पत्प्रद-
श्चेत्तत्साम्प्रतमेक एव सुखदस्त्वं देवदेवोऽसि यत् ॥ १५

चेज्जागर्त्ति यदीयदिव्यमहिमा सर्वत्र रोगादिभी-
र्निर्भेदे सुभगत्वभोगविभुता श्रेयो यशःस्पर्शने ।
स त्वं स्तम्भनपार्श्व ! विश्वप ! तदा सत्यप्रतिज्ञोदितः
सर्वेष्टाभ्युदयार्पणेष्वसि जगज्जन्तोस्तदत्रोचितम् ॥ १६

पार्श्व ! त्वं भुवनेषु सर्वद इति ख्यातिं प्रपन्नोऽसि वा-
ऽनन्तैश्वर्यसुसम्पदां पदमसि त्वं शक्त्यनन्तत्वभुक् ।
यत्तत्प्रीणय सेवकं श्रितमिमं सत्यार्थदानैस्तथा,-
ऽनन्तश्रीविभवाकरस्त्वमिव सो भक्तो यथा स्यात्प्रभुः ॥ १७

इत्थं श्रीगुरुराजहर्षविनयश्रीसूरिहस्तम्भन !
श्रीपार्श्वेश्वर विश्वहर्षविनयश्रीसूरिपूज्यक्रमः ।

नीतः स्तोत्रपथं विधेहि विधिना बोधिप्रबोधोदयम्
त्रैलोक्योदितधर्महंससरसक्रीडासरः श्रीपदम् ॥ १८

मुनिप्रवरश्री विनयहंसगणिविरचितम्

## १३. ॥ श्रीनारङ्गपार्श्वदेवाधिदेवस्तोत्रम् ॥

(शार्दूलविक्रीडित)

यः स्वामित्वपदोचितस्त्रिभुवने सर्वात्मनाऽऽर्यात्मनाम्
नित्यानन्ददभोगरङ्गविधिना हत्वा कुरङ्गस्थितिम् ।
कुर्वन् सान्वयसौवनामसुसुखाकर्षीव किं स्वं वपु,-
र्धत्ते धाविसुधामभिः स तनुतां नारङ्गपार्श्वेश्वरः ॥ १

स्वामिंस्ते सरसामियर्त्ति जगतां नारङ्गपार्श्व ! प्रभो !
दृष्टाभीष्टविशिष्टशिष्टपदवीदानैः सदादेयताम् ।
नाश्चर्यं तदिदं विनिर्मितवती सा पूर्वचिन्तामणे,-
श्चिन्तातीतफलप्रदानणुगुणैः सत्पुद्गलैरस्ति यत् ॥ २

जीरापल्ल्यभिधाभिधेयमहिमाऽऽमान्यः स पार्श्वक्रमः
पार्श्वः पार्श्वगसम्पदः समसुखं दत्ते यथा सर्वतः ।
श्रीपञ्चासरसञ्ज्ञकः कलियुगे पार्श्वो यथा सिद्धिदः
सौभाग्याभ्युदयप्रदोऽपि च यथा पार्श्वो भटेवाभिधः ॥ ३

भाभाको नवपल्लवश्च गउडी भर्त्तान्तरीकाधिपः
श्रीसङ्खीसर इत्यनेककलनोल्लासीह पार्श्वो यथा ।
सर्वाशापरिपूरकोऽस्ति परितस्तद्वज्जगच्छम्पदै-
स्त्वं सम्प्रीणय सम्प्रति प्रतिपदं नारङ्गपार्श्वोत्तमः ॥ ४

यस्यात्यद्भुतजात्यसद्गुणगणोऽनन्तत्वसङ्ख्याश्रयं
शिश्रायामितदुस्तराम्भवभवां दुष्कर्ममर्मस्थितिम् ।
पेषम्पेषमनन्तसङ्ख्यभविनां किं यौगपद्यादिव
श्रेयःपूतगतिं विधातुमिह सः सार्वोऽस्तु सिद्ध्यै सताम् ॥ ५

श्रीधर्म्मावनिपो वसन् वरपुरे यस्य प्रशस्यस्थितीन्
पत्राकारयतीव किं स्वककरैः स्थातुं स्फटव्याजतः ।
सप्तद्वीपमहीमहामहरमां मान्यां वदान्यैरिमां
श्रीनारङ्गविभुः प्रभूतविभुताभूत्यै स भूयाद्भुवि ॥ ६

पादौ पादतरौ करौ सुखकरौ नेत्रे प्रसन्नोज्ज्वले
चेतः शान्तकृपारसप्रसरणं वक्त्रं प्रसन्नप्रभम् ।
भालं भाग्यकलाकलं गुणमयाकारप्रतीकेति ते
दृष्टा मूर्त्तिरमूर्त्तमौक्तिकसुखं केषां न दत्ते विभो ! ॥ ७

देवाः केचन दूरदर्शिन इमे नो केचन स्त्रीरताः
शस्त्रव्यग्रकराश्च केचन पुनर्नानावतारादराः ।
केचित्केचन सृष्टिसंहृतिपराः केचित्स्वयं नर्त्तिनो
मिथ्यैताः सुरजातयस्तु सुगुणैस्त्वं सत्यदेवः प्रभो ! ॥ ८

यन्माहात्म्यमहाद्भुतातिशयतः सर्वोपतापापदो
दृष्टादृष्टभियो भियेव भविनां नश्यन्ति रिष्टेतयः ।
तन्नाश्चर्यमनन्तमङ्गलसुखास्वादप्रदानात्मकः
स श्रीपार्श्व ! जगत्त्रयावनपदव्येकव्रती त्वं हि यत् ॥ ९

देवत्वोदितलक्षलक्षणकलालङ्कारचूडामणिं
ज्ञात्वा त्वां भविनः श्रयन्ति जिन ! यत्तेषां तथा सिद्धयः ।

सर्वाः स्युश्च तदत्र युक्तमपरे देवा मृषालक्षणै,-
र्लक्ष्यास्त्वं तु यथातथपृथुगुणैः स्वस्थं पदं प्रापयन् ॥ १०

रागद्वेषमहाद्विषद्वति भवारण्येऽतिभीतात्मनाम्
त्वत्पादौ शरणं ह्यरीणमिहमौ (?) नारङ्गपार्श्वप्रभो ! ।
यत्तत्साम्प्रतमत्र वक्त्रभिदुराभेद्यासिलेखाधनु-
र्मुख्यास्त्राणि जयावहानि वहतस्तौ शस्तसिद्ध्यै यतः ॥ ११

त्वद्रूपं जितकामरूपमुपमातीतस्वरूपं तपो,-
रूपव्यापनिषेवरूपमहिमाटोपं च तापापहम् ।
दृष्टं दुष्टनिकृष्टकष्टघटनां केषां पिनष्टीश ! न
त्रैलोक्ये विशिनष्टि शिष्टसुषमास्वादं च नाज्ञाजुषाम् ॥ १२

पञ्चत्रिंशदुदारसद्गुणगणां वाणीं तवाकर्ण्य के
नन्दस्वर्णमयाब्जमण्डितपदाष्टप्रातिहार्यश्रियम् ।
सञ्चिन्त्यातिशयान्निभाल्य च चतुस्त्रिंशन्मितान् देशना-
भूः संसेव्य सुदर्शनं शिवपदं नाऽऽर्याः प्रभो ! भुञ्जते ॥ १३

त्वद्ध्यानामृतपूरपानवशिनां किं किं करस्थं सुखम्
न स्यादर्त्तिरुदेति कापि हृदि किं भाग्योदयः किं न कः ।
सर्वाशा न फलेग्रहिः किमखिलैश्वर्याणि किं नाश्रय-
न्त्यानन्त्येन शिवावहानि भुवने नारङ्गपार्श्वेशितः ! ॥ १४

इत्थं श्रीगुरुराजहर्षविनयश्रीसूरिपूज्यक्रमा-
म्भोजः प्राज्यगुणैः स्तुतः स्तुतिपदज्ञानादिरत्नोदयः ।
चम्वा-दुर्जयकर्मणां मयि तनु त्वं पार्श्व ! विश्वेश्वर !
श्रेयः श्रीनिधिधर्महंसमहिमाऽऽराज्यं जयश्रीवरम् ॥ १५

मुनिप्रवरश्री विनयहंसगणिविरचितम्

## १४. ॥ श्रीगौडिकपार्श्वनाथस्तोत्रम् ॥

(शार्दूलविक्रीडित)

यन्मूर्तेः श्रितसन्निधेर्विधिविदः प्राहुर्मुधाऽमी कुत,-
श्चिन्तारत्नतुलां यदैहिकमिदं दत्ते कियच्चिन्तितम् ।
चिन्तातीतमनन्तमिष्टमुपमेयार्थस्तनोत्यङ्गिनाम्
स श्रीगौडिकपार्श्वपार्श्वमहित त्वं मे प्रसीदोदयैः ॥ १

क्षेत्रं१-वास्तु२-हिरण्य३-दास४-पशवः५ पञ्चेन्द्रियार्था६ यथा,-
ऽभीष्टं शिष्टगृहस्थनैकविभवः८ सर्वाङ्गभोगप्रदः ।
यत्सेवातिशयप्रभावविभयाऽवश्यं भवेद्भाविनाम्
नुर्जन्मन्यभयप्रदोऽस्त्वभयदः पार्श्वः सुपार्श्वः स नः ॥ २

स्वामिस्तावकपावकेक्षणगुणाकर्णार्हणाध्यानतः
स त्वा भक्तिभृतः स्युरिन्द्रसुरताराज्यादिभावाकराः ।
सुश्लोका यदि तत्किमद्भुतमिह त्वं यत्त्वदेकप्रभो,-
र्दाताऽसि स्वपदस्य शस्यविभुता भोगस्य सल्लीलया ॥ ३

पङ्गुर्नृत्यति भक्तिमांस्त्वयि विभो तारां दिवा वीक्षते,-
ऽप्यन्धो धन्यधनी च दुर्विधविधः सम्पत्पदी किङ्करः ।
विश्वैश्वर्यवरो वरोऽपि यदहो निष्णो जडो गौडिक !
त्वद्ध्यानप्रभवप्रभावविभुता किं किं न कुर्यान्नृणाम् ॥ ४

साक्षादेष भवोऽर्णवोभयमयस्तत्रोर्म्मयः पाथसाम्
तत्तद्दुःखजनुर्विपत्तिविपदो नक्रादियादःस्थितिः ।
तत्रारङ्गवियोगरोगगतयस्तत्र त्वदेकक्रमो,-
पास्तिः पोतवदेतदुद्धृतिपदं नृणामरीणं प्रभो ! ॥ ५

श्रीमद्गौडिकपार्श्व !! विश्वप भवन्माहात्म्यशक्त्यैव यत्
पारीन्द्रा अपि सज्जनन्ति फणिनो माल्यन्त्यमित्रा अपि ।
मित्रन्त्यत्र पराजयोऽपि विजयत्यापच्च सम्पत्पद,-
त्येतत्साम्प्रतमाश्रितेषु यदसि त्वं सौख्यपोषाकरः ॥ ६

तत्तद्दोषविशेषपोषकलुषात्मानः कुदेवाः परे
देवाभासतया स्थिता हरिहरब्रह्मादयः किं तु मे ।
हृद्येकस्त्वमशेषलक्षणसखः सत्यः सुसेव्यः स्फुरन्
देवत्वेन जिनः श्रितेषु शिवदः श्रीपार्श्वदृश्योऽसि यत् ॥ ७

त्वद्रूपं महिमैकरूपपरमं दृष्टं सदेकान्तहृद्
भक्तीनां बहिरामयादिविपदं नो हन्त्यमूं केवलम् ।
अन्तःकर्ममया ममाप्यथ पृथुस्पष्टेष्टशिष्टोन्नतिम्
दत्ते केवलमत्र नापि तु विभो ! स्वर्गापवर्गश्रियम् ॥ ८

श्रीसम्यक्त्वमिदं यदुक्तमसमं भव्यात्मनां सेवितम्
किं किं कामितमातनोति न यथा ज्ञानं चरित्रं तथा ।
युक्तं तद्यदिहास्ति सत्यमयतां सर्वात्मना सन्दधत्
यः स्वस्मिंश्च परेषु गौडिकविभुर्दद्यात्स मे सम्पदम् ॥ ९

षड्द्रव्यं नयभावनाभिमतसत्तं नन्दतत्त्वं जग,-
न्नित्यानित्यमयं प्रमाणयुगलीमेयं महायुक्तिभिः ।
आदेशद्वयसप्तभङ्गरचनावाच्यं विभो ! दीदिशो
यत्त्वं युक्तमिदं यथास्थितविदः सत्यार्थवाक् त्वं यतः ॥ १०

इत्थं पूज्यपदस्थहर्षविनयश्रीसूरिसेवोचितम्
नीत्वा स्तोत्रपथं भवन्तमुदितानन्दोदयादन्वहम् ।

याचेऽहं वरबोधिबीजपदवीलब्धिं प्रभो ! गौडिक !
श्रीपार्श्व ! श्रितधर्म्महंसमहिमां सौभाग्यभाग्याकरम् ॥ ११

मुनिप्रवरश्री विनयहंसगणिविरचितम्

## १५. ॥ श्रीचिन्तामणिपार्श्वनाथदेवस्तोत्रम् ॥

(शार्दूलविक्रीडित)

दानैः पूर्ण इहापरः सुरमणिर्नैवास्ति किञ्चिन्मनो-
ऽभीष्टप्रापणतो विचिन्त्य किमिवेत्यानन्त्यसङ्ख्योचितैः ।
सौख्यैः पुष्टमनिष्टमुक्तमखिलं कुर्वन् स्वयं यो जग,-
च्चिन्तामण्यभिधां व्यधात्स भविनां पार्श्वप्रभुर्भूतये ॥ १

स्वामिंस्तेऽद्भुतमूर्त्तिरर्त्तिशमिनी नेत्रामृतस्यन्दिनी
दृष्टानिष्टनिकृष्टकष्टदलिनी शिष्टेष्टशन्मृष्टिकृत् ।
स्याच्चेच्चित्रमिदं किमत्र यदियं सत्यामृताणूदिता-
नन्तानन्तपदप्रदैः सुखदलैः सृष्टैकतीर्थप्रथा ॥ २

अस्मत्स्वाम्ययमर्थसार्थमखिलं सर्वात्मनोद्द्योतयं,-
स्त्रैलोक्यस्थतमोपहत्वकलया नैते तथा किं मुधा ।
विश्वोद्द्योतमदा इमे तदिति किं क्रोधादिवोद्ध्र्वङ्गता
जेतुं पूषकरान् यदंह्रिनखभा पार्श्वः स दद्यान्मुदम् ॥ ३

श्रेयः श्रीसरसद्रवेशसमये किं तोरणालीवर-
स्रक्श्रेणी किमु सम्पदां किमु भवाब्धौ सेतुबन्धोद्भवः ।
आपत्कूपपतज्जनोद्धृतिवटीपङ्क्तिः किमेवं लसेत्
यत्पादाब्जनखप्रभासु सुधियां बुद्धिः स पार्श्वः श्रिये ॥ ४

राजाऽमात्यमुखाप्यशेषजनता मित्रत्यवश्यं श्रियः
सङ्क्रीडन्ति पदे पदे सरसता सर्वत्र सम्पन्निधिः ।
यद्येवं कलिरप्यहो कृतयुगत्याज्ञाजुषां ते तदा
किं चित्रं समयत्रयेऽपि जिन ! यच्चिन्तामणिस्त्वं प्रभुः ॥ ५

यत्प्राणिप्रभवप्रभावविभवैर्दानं व्रतादानिता
पूर्वं सम्प्रति यस्य पूजनमनोध्यानादि चेद्भाविनाम् ।
सत्यानन्दपदप्रदश्रियमदाद्दत्ते च तत्साम्प्रतम्
यच्चिन्तामणिपार्श्वविश्वप इहास्ते सर्वदः स्वस्तरुः ॥ ६

पार्श्वज्ञानमनन्तपर्ययमयं स्वार्थावबोधक्षमम्
प्रत्यक्षं सदहो परोक्षगमतामादाय भव्यात्मनाम् ।
भावोद्द्योतकृतेः परोपकृतिकृत्सौख्याय यज्जातवत्
तत्स्थाने महतां विभूतिरखिलाऽप्यन्योपकाराय यत् ॥ ७

श्रीचिन्तामणिपार्श्वविश्वप ! तवात्मारामिता दानिता
सम्यक्त्वं चरणव्रतस्थितिगतिव्याख्याद्यभूत्सम्पदे ।
पूर्वं स्वस्य परस्य सम्प्रति भवन्मूर्त्तिर्भवेद्भूतये
चेत्तद्युक्तियुतं यदत्र विधिना पूर्णाः क्रियाः सिद्धिदाः ॥ ८

भव्यात्मोरसि जाग्रति त्वयि सति त्रस्ता इव स्युः कथम्
त्राता रोगवियोगभङ्गभयदुःश्लोकोपसर्गेतयः ।
सम्पत्तिस्तु पदे पदे भुवि सदानन्दोदिता चेत्तदा
किं यत्किं न भवेत्तमोभरहरोद्द्योतः सतीनोदये ॥ ९

स्वामिंस्ते भवभीभिदौ भुवि सदानन्दौ पदौ सत्करौ
सारोदारपरोपकारसुकरौ कारुण्यपुण्यं सुहृत् ।

नेत्रं शान्तरसार्णवः सुवदनं नित्यं प्रसन्नोज्ज्वलम्
यत्तद्युक्तमिहोदितं त्वयि विभो ! पुण्यप्रकृत्यैव यत् ॥ १०

जातिव्यक्तिमयं जगद् यदि तदा नेतः स्तुतिस्ते तथा
किं न स्यादुचितेव जातिभिदि तत्सार्वाग्दृशां मादृशाम् ।
नो चेत्स्युर्भगवंस्त्वदीयसुगुणग्रामानुवादं विना
केनोपायवशेन सौववचसां साफल्यभाजो जनाः ॥ ११

श्रीचिन्तामणिपार्श्व विश्वजयद ! त्वन्नाममन्त्रेण चेत्
सर्वाः कामितसिद्धयस्तव नुतेः किं तर्हि सार्वोच्यते ।
किं त्वेषा भवदीयभक्तिवशतः स्यादाप्तभक्तीरितो
यत्त्वां स्तौमि जडोऽप्यहं तदुचितं यद्वाक्फलं सन्नुतेः ॥ १२

सर्वेषामपि सर्वदोऽस्ययमिति प्रष्ठप्रतिज्ञा प्रभो !
शश्वत्पारयसि प्रभुत्वपदवीशिक्षापरीक्षाक्षमः ।
सर्वाभीष्टपदानि सम्प्रति तथा शिष्टेषु यत्पूरय,-
स्येतत्तूचितमत्र पार्श्व ! यदहो त्वं विश्वचिन्तामणिः ॥ १३

श्रीपार्श्वप्रभुमश्वसेननृपसद्वंशेष्टचिन्तामणिं
तत्त्वातत्त्वसतत्त्वसुस्थितवृषाम्नायस्थितिद्योमणिम् ।
सेवे भक्तिसुयुक्तितोऽखिलकलोल्लासत्रियामामणिं
वामाकुक्षिमणिं तमोगृहमणिं नाम्नैकचिन्तामणिम् ॥ १४

इत्थङ्कारमुदारसारसरसात्मारामभक्त्या स्तुत,-
स्त्वं चिन्तामणिपार्श्व ! हर्षविनयश्रीसूरितानन्दया ।
त्रैलोक्योदितधर्महंसपदवीमान्यं तथा देहि मे
बोधिं बुद्धिनिधिं यथातथपथश्रीणां प्रतिष्ठा यथा ॥ १५

मुनिप्रवरश्री विनयहंसगणिविरचितम्

# १६. ॥ श्रीपार्श्वदेवशिरःस्थ-फणावलिवर्णनस्तोत्रम् ॥

(शार्दूलविक्रीडित)

सप्तद्वीपरमाश्रिता इव जगद्दारिद्र्यदावाकुलं
वीक्ष्योद्धर्तुमिहेव किं नयरयाः सप्तापि तत्त्वानि वा ।
मूर्त्ताः स्वोन्नतिदर्शनाय निपुणा उत्प्रेक्षका यत्स्फटा-
टोपारोपपरा इति श्रितहितं तन्यात्स पार्श्वप्रभुः ॥ १

मेरुर्दारमहाव्रतोन्नतिपदान्युद्दामधर्माश्रमाः
सप्तापीवनसपानपिण्डविषया हर्षादशेषैषणाः ।
सम्यग्लालनपालनादिकलयोद्वोढुं कलं यं स्वयं
तेनुः सौवशयान्नमज्जनमनः पूयात्स पार्श्वो जिनः ॥ २

विश्वैश्वर्यमयस्य वन्द्यपदवीपूतस्य यद्भाग्यभू-
पालस्य स्वतनूच्चसद्मनि महाभाले गवाक्षायिते ।
लीलाखेलनलालसस्य शिरसि छत्रावलीवोज्ज्वला
किं लक्ष्येत फणोपधेरिह बुधैः सोऽस्तु श्रियेऽर्हन् सताम् ॥ ३

वेदाग्निप्रमितातिशाय्यतिशयश्रीभिः समं क्षायिका-
नन्तज्ञानसुदर्शनैकचरणारीणेन्दिराणां मिथः ।
क्रीडामण्डपसम्पदेव शुशुभे किं यत् फटालीनिभात्
शिष्टाशेषसुखाय शङ्खनिरसौ सार्वः शिवायास्तु वः ॥ ४

श्रीपार्श्वेश्वरशीर्षखेलनवनेशस्यालये श्रीलये
स्थाणूष्णीषशिलोच्चयोऽखिलकलारामैकलीलास्पदम् ।

नो चेत्तत्र कथं कथञ्चन फणश्रेणीमिषाल्लक्ष्यते
मुग्धस्निग्धतरप्रदीप्रसरसा वेणीलता धारणी ॥ ५

कर्पूरेऽपि न तादृशो मृगमदे नाब्जेषु नो चन्दने
नैवार्हद्वचनास्यशीर्षसरसश्वासेषु यादृग्गुरुः ।
आमोदः प्रभवेदितीव हृदि किं निश्चित्य तं सेवितुं
प्रीत्याऽगान्मधुपावलीफणमणीश्रेणीघृणीच्छद्मना ॥ ६

श्रीवामेयविभो ! त्वमेव मलिनत्वं सर्वतापान् प्रभु-
र्हर्तुं च क्षणभङ्गुरत्वमभितः स्वस्येव भव्यात्मनाम् ।
तन्मे तद्विपरीततां तनु तथा वन्द्यात्मतां चिन्वगा-
देवं किं ज्ञपनार्थमभ्रपटली नेतुः स्फटालीच्छलात् ॥ ७

किञ्चित्कामितदा वयं न तु समाभीष्टार्थसिद्धिप्रदा-
स्तन्नोऽनन्तसुखप्रदानविभुतां त्वद्वत्प्रदेहि प्रभो ! ।
विज्ञप्तिं किमिवेति कर्तुमुचितां सम्भूय नीलं वनं
कल्पानां सकलं फटोपधिधरं स्वं स्वामिनं सेवते ॥ ८

स्वामिंस्त्वद्वचनामृतानुभविनां भव्यात्मनां दुर्दशां
मा कुर्वन्तु कदाप्यदृष्टविकटाटोपाः परीपाकिनः ।
इत्युद्भाव्य तदेतदाह विधये सप्तार्चिरेव स्वयं
सौवार्चिर्निचयं ज्वलन्तमतनोत्कूटात् स्फटानामिव ॥ ९

लब्धालब्धिसुदर्शनैकचरणज्ञानाद्यसत्सम्पदो
धर्मध्यानतपःक्रियादिभिरिह स्वामिंस्त्वयैकान्ततः ।
रक्तासक्ततया मिथः पृथुमुदा मैत्र्यङ्गुलीधोरणी
वक्राश्चक्रुरिव स्वयं समरसास्वादाः फणालीमिषात् ॥ १०

किं विश्वासुमतां महार्त्तिशमनौषध्य: प्रतिष्ठाप्रथा:
किं कारुण्यकलालया: किमु सितध्यानाङ्कुरश्रेणय: ।
किं किं ब्रह्ममहालयोन्नतदृढस्तम्भा भवाम्भोनिधौ
द्वीपा: किं भविकात्मनां सुमनसां किं मूर्त्तिमत्सिद्धय: ॥ ११

किं लावण्यविशालकेलिकलना: किं विश्वशर्माश्रमा:
सर्वानन्दरसाकरा: किमु किमु ज्योतिर्जटामण्डपा: ।
किं शोभानिधय: सुधोज्ज्वलकला: किं ज्ञानशाला: किमि-
त्युत्प्रेक्षेक्षणधीधना: सहृदया: प्रेक्ष्य प्रभो: स्यु: फणान् ॥१२

नानाजन्मजरामृतिप्रभृतिका घोरातिघोरापद:
पाथोवीचिचयाश्च तैरतितरां भीमो भवाब्धिर्भवेत् ।
तस्मिंस्तारणतत्परं प्रभुवपुर्बोहित्थमुज्जृम्भते
नो चेदभ्रपरम्परा कथमिह प्रेक्ष्या स्फटालीनिभात् ॥ १३

सेवध्वं भुवि सार्वसत्यवचनं श्रीधर्ममर्माज्ञया
भव्याश्चेद्भविकोद्भवाभयसुखे हावोऽथ सेवामहे ।
किंकर्य: प्रति तान् वयं प्रमुदिता इत्याशयाऽऽवेदनं
कुर्वन्त्य: स्फटकैतवादिव मुदा किं कल्पवेल्ल्य: स्थिता: ॥१४

यन्मूर्ध्नि स्फटकूटत: प्रकटिताटोपा: स्फुटं सम्पद:
सप्तद्वीपपथोद्भवा इव समुद्धर्तुं जगद्दु:खत: ।
सम्भूय स्थितिमीयुरद्भुतसुखास्वादं च कर्तुं स्वयं
तं सेवे सुरपार्श्वसेवितपदं श्रीपार्श्वविश्वेश्वरम् ॥ १५

त्वज्ज्ञानालयशालिनां सुविमलैर्भेदप्रभेदैर्वृता-
ङ्गानां तत्त्वनयात्मनां शुभवतां सप्ताख्यसङ्ख्याजुषाम् ।

श्रीपार्श्वेश्वरखेलनोज्ज्वलकलालीलाविलासाय किं
रेजे दिव्यगवाक्षसङ्गतिरिव स्फारस्फटाकूटतः ॥ १६

क्षारत्वं क्षणभङ्गुराङ्गलहरीदोलायमानस्थितिं
तत्तद्दोषविशेषपोषकलुषां स्वश्यामलत्वप्रथाम् ।
दोषैर्मुक्तगुणैः सयुक्तसततं नस्त्याजयाशु प्रभुं
विज्ञप्तिं प्रथयन्ति किं स्फटतनूः कृत्वेति सप्ताब्धयः ॥ १७

सौभाग्यातिशयातिशायि चरितं ज्ञानं महादर्शनं
चारित्रं सुपवित्रमद्भुतवचः श्लोकोऽपि रूपं परम् ।
आचारप्रचरिष्णुतोत्तरतरासप्तेति लोकोत्तरै,-
श्वर्याविदकृतः किमु स्फटमिषात्सौभाग्यरेखा इव ॥ १८

रागद्वेषमुखद्विषज्जयरयःपञ्चाक्षशिक्षाद्भुताऽऽ-
नन्दब्रह्मसुगुप्तितस्त्रिभुवनोन्माथिस्मरारेर्हरः ।
जन्मादृष्टचतुर्गतिस्थितिसृतिक्राथः पृथुश्चेति किं
सप्तोरुस्फटकैतवेन सुयशःस्तम्भा इवेहोदिताः ॥ १९

सप्तानां नरकाख्यदुर्गतिमहातिर्यग्गतीनां दृढ-
द्वारोद्घाटनियन्त्रणाय जिन ते वाक्यार्थसत्यार्थिनाम् ।
श्रेयः श्रीनिधिसन्निधिस्थितिगतीनां सन्मतीनामियं
मन्ये किं हयमेयदुर्गपरिघश्रेणी फणालीनिभात् ॥ २०

किं श्रेयः स रसालयः कलिमलप्रक्षाललीलासरः
किं संसारजतापशापशमने पीयूषकुण्डोद्भवः ।
किं मूर्त्तः शमसद्रसः किमु कलाकेलीगृहं किं स्फटा,-
टोपं प्रेक्ष्य विभोर्मतिर्मतिमतामेवं स्फुरच्चेतसि ॥ २१

इत्थं श्रीगुरुराजहर्षविनयश्रीसूरिपूज्योदयं
भक्तिव्यक्तिसुयुक्तियुक्तकरण ! श्रीपार्श्व ! विश्वेश्वर ! ।
स्तुत्वा त्वां स्वयमर्थये सुखनिधिं श्रीबोधिचिन्तामणिं
श्रेयः श्रीमयधर्महंससुमहःसन्दोहशोभापदम् ॥ २२

पू.उपा. श्री समयसुन्दरगणिविरचितम्

## १७. ॥ श्रीशङ्खेश्वरपार्श्वनाथलघुस्तवनम् ॥

श्रीशङ्खेश्वरमण्डनहीरं, नीलकमलकमनीयशरीरं,
गौरवगुणगम्भीरम् ।
शिवसहकारमनोहरकीरं, दूरीकृतदुष्कृतशारीरं,
इन्द्रियदमनकुलीरम् ॥ १

मदनमहीपतिमर्दनहीरं, भीतिसमीरणभक्षणहीरं,
मरणजरावनजीरम् ।
संसृतितप्तिगुडाश्रितजीरं, वचननिरस्तसितागोक्षीरं,
गुणमणिराशिकुटीरम् ॥ २

समतारसवनसिञ्चननीरं, विशदयशोनिर्जितडिण्डीरं,
त्रिभुवनतारणधीरम् ।
धीरिमगुणधरणीधरधीरं, सेवकजनसरसीरुहसीरं,
रागरसातलसीरम् ॥ ३

दुरितरजोभरहरणसमीरं, गजमिव भग्नकषायकरीरं,
करुणानीरकरीरम् ।
सुरपतिअंसनिवेशितचीरं नखमयूषविधुरितकाश्मीरं,
प्राप्तभवोदधितीरम् ॥ ४

अश्वसेननृपकुलकोटीरं, निर्मलकेवलकमलावीरं,
श्रीजिनचन्द्ररतीरम् ।
सकलचन्द्रमुखमनुपमहीरं, प्रणमत समयसुन्दरगणिधीरं,
वन्दे पार्श्वमभीरम् ॥ ५

पू.उपा. श्री समयसुन्दरगणिविरचितम्
पूर्वकविप्रणीतकाव्यद्व्यर्थं करणमयं

## १८. ॥ श्रीअमीझरापार्श्वनाथस्य लघुस्तवनम् ॥

अस्त्युत्तरस्यां दिशि देवतात्मा, हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य, स्थितः पृथिव्या इव मानदण्डः ॥१
(उपजाति)

(कुमारसम्भवे)
कश्चित् कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्त्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु ।
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ (मन्दाक्रान्ता) २

(मेघदूतकाव्ये)
श्रियःपतिः श्रीमति शाशितुं जगत्
जगन्निवासो वसुदेवसद्मनि ।
वसन् ददर्शाऽवतरं तमम्बरात्,
हिरण्यगर्भाङ्गभुवं मुनिं हरिः ॥ (वंशस्थ) ३

(माघकाव्ये)
बालोपि यो न्यायनये प्रवेश-
मल्पेन वाञ्छत्यलसः श्रुतेन ।
सङ्क्षिप्तयुक्तान्विततर्कभाषा,
प्रकाश्यते तस्य कृते मयैषा ॥ (उपजाति) ४

(तर्क भाषा) - मित भाषिण्याम्
हेतवे जगतामेव, संसारार्णवसेतवे ।
प्रभवे सर्वविद्यानां, शम्भवे गुरवे नमः ॥ (अनु.) (सप्त पदार्थी)५

सुखसन्तानसिद्ध्यर्थं, नत्त्वा ब्रह्माच्युतार्चितम् ।
गौरीविनायकोपेतं, शङ्करं लोकशङ्करम् ॥ (अनु.) (वृत्तरत्नाकरे) ६

एवं पूर्वकविप्रणीतविलसत्काव्यैर्नवीनार्थतः
आनन्देन अमीझराभिधविभुश्रीपार्श्वनाथस्तुतिम् ।
श्रीमच्छ्रीजिनचन्द्रसूरिसुगुरोः शिष्याणुशिष्यो व्यधात्
सोल्लासं समयादिसुन्दरगणिश्चेतश्चमत्कारिणीम् ॥ (शा.वि.) ७

पू.उपा. श्री समयसुन्दरगणिविरचितम्

## १९. ॥ श्रीचिन्तामणिपार्श्वनाथ-श्लेषमयलघुस्तवनम् ॥

(अनुष्टुप्)

उपोपेत तपो लक्ष्म्या, उदुज्ज्वल यशोभर ।
प्रप्रकृष्ट-गुण-श्रेणि, सं संश्रित जय प्रभो ॥ १

दूरस्थमपि पार्श्व ! त्वां, यन्मे हृदभिधावति ।
यस्य येनाभिसम्बोधो, दूरस्थस्यापि तेन सः ॥ २

एकधातोरनेकानि, रूपाणि किल तत्कथम् ।
एकमेवाऽभवद्रूप-मथिते सप्तधातुभिः ॥ ३

केवलागममाश्रित्य, युष्मद्व्याकरणे स्थिताः ।
सिद्धिं प्रकृतयः प्रापुः पार्श्व चित्रमिदं महत् ॥ ४

एवं देव ! दयापर ! चिन्तामणिनामधेय ! पार्श्व ! त्वाम् ।
गणिसमयसुन्दरेण, प्रसंस्तुतः देहि मुक्तिपदम् ॥ (गाथा) ५

पू.उपा.श्री समयसुन्दरगणिविरचितम्

## २०. ॥ यमकमयंपार्श्वनाथ-लघुस्तवनम् ॥

(इन्द्रवज्रा)

विज्ञान-विज्ञा न नुवन्ति के त्वां, मासार-मासारमधर्मपङ्के ।
नीराग-नीरागम-कानने सहेला-महेला-मव-हेलयन्तम् ॥ १

सद्यः प्रसद्य प्रकटोपदेश-नावासनावासवसेवितांह्रे ।
मेधार मे धारय दुःखतोये, साद-प्रसाद-प्रणतं पतन्तम् ॥ २

सत्याग-सत्यागम-केवलेन, विस्फार-विस्फारय मे सुखानि ।
वामाभवामाभव-पार्श्वनाथा-पद्मार-पद्मारतिराज-राज ॥ ३

चिन्ताम-चिन्तामणि-रीश देवमायाति मायातिमिरे गभस्तिम् ।
तस्या-मत स्यामहरं करे त्वं, दानं ददानं-दडिनं विनौति ॥४

पद्मां विपद्मां विदुषां दिशन्तं शान्तं निशान्तं नियतं गुणानाम् ।
सेवामि सेवामि तमुत्त्रिलोकी-नाथं सनाथं समया मयाहम् ॥५

सङ्कल्प सङ्कल्पसमं नतेन्द्र ! कोटीरकोटीरमणीयपादम् ।
तारं जितारं जिनपं वरेण्य !, दन्तं भदन्तं भविका भजध्वम् ॥६

योगाय यो गाय... शस्ते, सोमानसोमाननदेव धन्यः ।
देवाधिदेवाधिमतङ्गसिहा, सत्कीर्ति-सत्कीर्त्तितमोक्षमार्गः ॥७

इति नुतो जिनचन्द्र दिवाकरः, सकलचन्द्रमुख प्रभुतावरः ।
यमकबन्धकवित्त्वकदम्बकैः, समयसुन्दरभक्तिविनिर्मितैः ॥८
(द्रुतविलम्बित)

पू.उपा. श्री समयसुन्दरगणिविरचितम्

## २१. ॥ श्रीपार्श्वनाथयमकबन्धस्तोत्रम् ॥

(द्रुतविलम्बित)

प्रणत मानव मानव-मानवं,
गतपराभव-राभव-राभवम् ।
दुरितवारण वारण-वारणं,
सुजन-तारण तारण-तारणम् ॥ १

अमर-सत्कल-सत्कल-सत्कलं,
सुपदया मलया मलयामलम् ।
प्रबल-सादर सादर-सादरं,
शम-दमाकर-माकर-माकरम् ॥ २

भुवननायक-नायक-नायकं,
प्रणितु नावज-नावज-नावजम् ।
जिन भवन्त-भवन्त-भवन्तमं,
स शिव-मापरमा-परमा-परम् ॥ (त्रिभिः.कु.) ३

रविसमोदय-मोदय मोदय,
क्रमण-नीरज-नीरज-नीरज ।

लस(स्फुर?)दु मामय-मामय-मामय,
व्यय कृपालय पालय पालयः ॥ ४

इति मया प्रभुपार्श्वजिनेश्वरः,
समयसुन्दरपद्मदिनेश्वरः ।
यमकबन्धकवित्त्वभरैः स्तुतः,
सकलऋद्धिसमृद्धिकरोस्त्वतः ॥ ५

पू.उपा.श्री समयसुन्दरगणिविरचितम्

## २२. ॥ समस्यामयं पार्श्वनाथबृहत्स्तवनम् ॥

(शार्दुलविक्रीडित)

त्वद्भामण्डलभास्करे स्फुटतरे भास्वत्प्रभाभासुरे
दृष्टे त्वेकपदे त्वदीयवदने पूर्णेन्दुबिम्बात्प्रति ।
धर्माख्यानविधौ त्वयीति भगवन् व्यज्ञायि ....
सूर्याचन्द्रमसौ प्रभातसमये ह्येकत्र किं रेजतुः ? ॥ १

विष्णुब्रह्ममहेश्वरप्रभृतयः सर्वेपि श....
... खलु पर्यवाः प्रतिदिनं प्रोच्यार्यमाणः परैः ।
श्रीअर्हन् भगवन् जगत्त्रयपदेस्त्वब्धेर्जलानां यथा
अम्भोधिर्जलधिः पयोधिरुदधिर्वारांनिधिर्वारिधिः ॥ २

श्रीवामेयगुणत्रगेयमहिमामेयाभिधेयाभिध-
त्त्वत्पादाम्बुजसुप्रसादवशतः राजत् त्रिलोकीपते ! ।
अन्धो पश्यति निर्धनो धनपती रङ्कोपि राजायते
मूको जल्पति संशृणोति बधिरः पङ्गुर्नरीनृत्यति ॥ ३

सिंहासनं समधिरोहयतः प्रभाते,

भामण्डलं भगवतः प्रविलोक्य दूरात् ।
प्राच्यां स्थितेन पुरुषेण विनिश्चितं य-
दभ्युद्यतो दिनकरः खलु पश्चिमायाम् ॥ (वसन्ततिलका) ४

त्वय्यशोभिरभितस्त्रिविष्टपे, शुभ्रितेऽभ्रशरदिन्दुसुन्दरे ।
पार्श्वदेव ! गुणरत्ननीरधे, कज्जलं रजतसन्निभं बभौ ॥ ५

(उपजाति)

लोकोत्तरां धर्मधुरां दधाने, देव ! त्वयि ज्ञानगुणप्रधाने ।
त्वद्वादिवक्त्रेषु तवोरुकीर्ति-सुधाव्यधादञ्जननीलिमानम् ॥ ६

मा दृष्टदोषोस्त्वतिसुन्दरत्वान्-
मात्रा कृतां कज्जलकृष्णरेखाम् ।
प्रभोः कपोले प्रविलोक्य कोप्यवक्,
पिपीलिका चुम्बति चन्द्रबिम्बम् ॥ ७

मनोभवे क्षोभयितुँ भवन्तं, समुद्यते तीर्थपते ! नितान्तम् ।
...स्त्वया तत्र नियन्त्रितं यत्सुतापराधे जनकस्य दण्डः ॥ ८

अस्यौपरिश्यामफणामणीनां,
प्रभा प्र............... ।
पार्श्वप्रभो ! कोपि विदो वदत्कि,
चन्द्रोपरि क्रीडति सैंहिकेयः ॥ ९

दशशतनयनौघैः स्वर्ण कुम्भ ....
विमलसलिलपूर्णैः स्नापिते श्रीजिनेन्द्रे ।
प्रवहदतुलपाथः प्रोच्छ....
........................ था दुरासीत्पयोधिः ॥ (मालिनी) १०

शस्त्रो हस्तप्रशस्तोऽभिनवकिशलयं शो...
... भिरामौ मधुकरनिकरप्रस्फुरन्नीलपद्मौ ।
कान्ता-दन्ताश्च कुन्दान् कथयत कवयः पार्श्वनाथस्य शम्भो ।
... कौ केकम्भ्कौ (?) कान्
प्रहसति हसतः फुल्लगल्लं हसन्ति ॥ (शा.वि.) ११

स जयत्वनिशं भुवनाधिपते स्त... सि स्व... तत्त्व वि .... ।
भुवि यास्मयदीय ववोनधि (?) सं
वदते वदते वदते वदते ॥ (तोटक) १२

इत्थं श्रीजिनचन्द्रसुन्दरजगत्स्वामिन् ! समस्यास्तवो
.... पुरतः प्रधाय वदते विज्ञप्तियुद्भक्तये ।
मोहेनात्तचतुर्गतिस्थितिनिजग्रासाय रोषावशान्
मह्यं देह्यथ पार्श्वदेव ! पदवीं त्वच्छासनस्थेयसीम् ॥(शा.वि.)१३

पू.उपा. श्री समयसुन्दरगणिविरचितम्

## २३. ॥ श्रीपार्श्वनाथलघुस्तवनम् ॥

(अनुष्टुप्)

प्रकृत्यापि विना नाथ, विग्रहं दूरतस्त्यजन् ।
केवल प्रत्यये नैव, सिद्धिं साधितवान् भवान् ॥ १

निर्जितो वारिवाहोऽर्हन्, गम्भीरध्वनिना त्वया ।
वहत्यद्यापि पानीयं, प्रतिसद्मा सितानन ॥ २

तव मित्र वदादेश, तथा शत्रुरिवागमः ।
समीहित-कृते रीति-संहृते शब्द-वारिधे ॥ ३

नित्यं प्रकृति-मत्त्वेऽपि, नाना-विग्रह-वर्त्तिनि ।
अभव्ये व्यभिचारित्वात्सर्व-सिद्धि-करं कथम् ॥ ४

निर्दयं दलयामास, शक्त्या सत्त्वर-मङ्गजम् ।
तद्भवं तं कथं नाथ, कृपालुं कथयाम्यहम् ॥ ५

एवं श्रीजिनचन्द्रस्य, पार्श्वनाथस्य संस्तवम् ।
चक्रे हर्ष-प्रकर्षेण, समयादिम सुन्दरः ॥ ६

पू.उपा. श्री समयसुन्दरगणिविरचितम्

## २४. ॥ श्रीपार्श्वनाथयमकबद्धलघुस्तवनम् ॥

पार्श्वप्रभुं केवलभासमानं,
भव्याम्बुजे हंसविभासमानम् ।
कैवल्यकान्तैकविलासनाथं,
भक्त्या भजेहं कमला सनाथम् ॥ (इन्द्रवज्रा) १

विघ्नावलीवल्लिमतङ्गभीर,
दिश प्रभो ! मेऽभिमतं गभीर ।
जगन्मनः कैरवराजराज,
नताङ्गिना शान्तिकराज राज ॥ (उपजाति) २

ततान धर्मं जगनाहतार,
मदीदह दुःखतती हतार ।
अचीकरच्छर्म सतां जनानां,
जहार दीप्तारशितां जनानाम् ॥ (उपेन्द्रवज्रा) ३

वेगाद्व्यनीषी दरिका ममादं,
श्रियापि नो यो भविकाममादम् ।
नुत प्रभुं ते च नता रराज,
शिवे यशः कैरवताररराज ॥ (उपजाति) (यमलम्) ४

उवष्टयेषामिह सेवकानां,
त्वं मानसे पुष्टरसेवकानाम् ।
सद्यो लभन्ते कमलां जिनेश,
ते देव कान्ता कमला जिनेश ॥ (उपजाति) ५

यन्नाम मन्दोपि तदा मुदारं,
वदन् पदं याति विदा मुदारम् ।
पोता पदम्भस्तरणेऽवदातः,
श्रियो जगद्देव मणेवदातः ॥ (उपजाति) ६

चिन्तामणि मे चटिता ममाद्य,
जिनेश हस्ते फलिता ममाद्य ।
गृहाङ्गणे कल्पलता सदैव,
दृष्टे तवास्ये ललिता सदैव ॥ (उपजाति) ७

एवं स्तुतौ यमकबद्धनवीन काव्यैः,
पार्श्व प्रभुर्ललित.....वितानभव्यैः ।
कर्त्तुः करोतु कुलकैरवपूर्णचन्द्रः,
सिद्धान्तसुन्दररतिं विनमत्सुरेन्द्रः ॥ (वसन्ततिलका) ८

पू.उपा. श्री समयसुन्दरगणिविरचितम्

## २५. ॥ श्रीपार्श्वनाथस्य शृङ्खलामयलघु-स्तवनम् ॥

प्रणमामि जिनं कमलासदनं,
सदनन्तगुणं कुलहारसमम् ।
रस मन्दमदम्भसुधानयनं,
नयनन्दित वैश्वजनं शमिनम् ॥ (तोटक) १

युवनोन्मुखकेशरिशाव्ररवं,
वरवंशपदा न तदा सहितम् ।
सहितं समया रमया मदना,
मदनाभि तिरस्कृतनीररुहम् ॥ (तोटक) २

वदनरवि बोधितानेकजनपङ्कजं,
पङ्कजं बालपाथोदसमसञ्चरम् ।
सञ्चरन्तं सरोजेषु सुतमोहरं,
मोहरम्भा गजे पार्श्वनाथं मुदा ॥ (त्रिभिः.) (स्त्रग्विणी) ३

विहितमङ्गल मङ्गल सद्रवि नुत जिनं सदयं सदयं जनाः ।
विगत देव न देवनरोचितं, गतकजामरचामरराजितम् ॥ ४
(द्रुत.वि.)

जिन यस्य मनो भ्रमरो रमते, रमते पदपद्मयुगं सततम् ।
सततं नववामकरन्दमिना, दमिनावनिपीयमुदं दमिनः ॥ ५
(तोटक)

महोदये वाम जिनं वसन्तं, जिनं वसन्तं शुभवल्लिकन्दे ।
सस्मार पार्श्वं सुमनो विमानं, मनो विमानं स जगाम यस्य ॥६
(उपजाति)

कल्याणकन्दे कमलं हरन्तं, जिने जनानेकमलं हरन्तम् ।
सतां महानन्दमहं स पद्म, पार्श्वं ददौ यो दमहंस पद्मम् ॥ ७
(उपजाति)

कल्पकल्पोपमं पूर्णसोमोदयं, मोदयन्तं जनान् वंसहंसप्रभम् ।
सप्रभं पार्श्वनाथं वहे मानसे, मानसेवालवातूलमेनं जिनम् ॥८
(स्रग्विणी)

एवं स्तुतो मम जिनाधिपपार्श्वनाथः,
कल्याणकन्दजिनचन्द्ररसा सनाथः ।
ज्ञानाम्बुधो सकलचन्द्रसमः प्रसद्यः
सिद्धान्तसुन्दररतिं वितनातु सद्यः ॥ (वसन्ततिलका) ९

पू.उपा. श्री समयसुन्दरगणिविरचितम्

## २६. ॥ श्रीपार्श्वनाथशृङ्गाटकबन्धस्तवनम् ॥

(द्रुतविलम्बित)

कमन-कन्द-निकन्दन-कर्म्मदं,
कठिन-कक्ष-ममा नमति समम् ।
मदन-मन्दर-मर्दन-नन्दिरं,
नयन-नन्दन-नन्दनि निद्र्धनम् ॥ १

निखिल-निर्वृत-निश्वन-नर्दितं,
नत जनं सम-नर्म्मद-दम्भमम् ।
दम-पदं विमदं घन-नव्यभं,
नभ-वनं हससं शिवसंभवम् ॥ २

सतत-सज्जन-नन्दित-नव्यभं,
नयधनं वरलब्धिधरं समम् ।
रदन-नक्रमन-श्चलन-प्रियं,
नलिन-नव्यय-नष्ट-वनं कलम् ॥ ३

ललवलं सकलं शम-लक्षितं,
ततमतं सततं निज जन्मतम् ।
जगदजं विरजं दम-मन्दिरं,
महित-मङ्गप पण्डित-पर्षदम् ॥ ४

पटुलपं शम-मञ्जुल-मण्डनं,
मधव-नन्दन-वर्यरवं ध्रुवम् ।
वदन-नर्जितभ-प्रभु-धर्मतं,
मदन-लब्ध-जयं गुण-बन्धुरम् ॥ ५

कपट-मन्दिर-तक्षण-दर्प्पहं,
रतत-तद्रुम-दन्ति-करं नुवे ।
नयवरं च भवन्त-महं मुदा,
त्रिभुवनाधिप पार्श्व-जिनेश्वरम् ॥ ६

सुजन-संस्तुत-विष्टप - सोदरं,
मुख-विनिर्ज्जित-वैधव-सम्पदम् ।

विगत-विड्वर-धीरम-मन्दिरं,
कज विलोचनयामल सद्‌गुणम् ॥ ७

(वसन्ततिलका)

संसार-रक्षक-कजानन-भाल-लष्टं,
सोल्लास-संहनन-वीततमोककष्टम् ।
निःकोप-पङ्क ललनं ...विधारिरिक्तं,
सन्ताप-कत्यभिदं ललवंश-शक्तम् ॥ ८

विश्वेश-शस्त-ममता-ममथं विविद्यम्,
मन्दार-रङ्ग-ददयौघ-घनाव-वद्यम् ।
रोगाववर्य गगनाय यशोविविक्तम्,
सन्नार-रञ्जन-कलङ्क-करम्भ-भक्तम् ॥ ९

इति पार्श्व-जिनेश्वर-मीश्वर-नुतमचिरेण,
शृंगाटक-बन्ध-नवीन-कवित्त्व-भरेण ।
गणपति-जिनचन्द्र-विनेय-सकल-विधु-शिष्य,
गणि-समयसुन्दर इममस्तावीत् सुविशिष्य ॥ १०

पू.उपा. श्री समयसुन्दरगणिविरचितम्

## २७. ॥ श्रीपार्श्वनाथ-हारबन्धचलच्छृङ्खला-गर्भितस्तोत्रम् ॥

(वसन्ततिलका)

वन्दामहे वरमतं कृत-सात-जातं,
तं मान-कान्त-मनघं विपरौघ-कोपम् ।

पद्मामलं परम-मङ्ग-कराऽमदाऽकं,
कष्टावली-कलिवनद्विप-हीन-पापम् ॥ १

पद्माननं पवन-भक्षवरं भवाऽवं,
वन्दारु-देव-मरुजं जिनराज-मानम् ।
नव्याजमान-मजरं धर सार-धीरं,
रम्याम्बकं रणवधं सुमनो-धरोमम् ॥ २

मन्दार-काम-मरमं समधाम-राम-
मर्हन्तमाऽमयतमस्तति सोमकान्तिम् ।
तिग्मो(स) सतान्ति तरु-पर्शु-समं परासं,
सन्ती(संसी)ति हास-मऽति-मर्दननाम-(माम)मानम् ॥ ३

गर्वाऽऽर-राग-हरमङ्गज-भीमराजं,
जन्त्वाऽऽनतं जयिन-मङ्ग सदाऽऽमदासम् ।
नष्टाऽशिवं नतशिवप्रद-मेव साद,
दम्भाऽयुतं दम-युतं सुगताऽन्तरङ्गम् ॥ ४

संसार-वासधर-शम्ब-समं शवासं,
सद्देव-दास-शिव-शर्म-करं शमैकम् ।
कम्रं कलाऽऽकर-कलं गल-भाल-शालं,
लब्धोदयं लसदनन्तमतिं नमामः ॥ ५

मञ्जूदयं मत-दयं शुभ-गेय-शोभं,
भव्यं विदम्भ-कवि-वन्द्य-पदाऽवजापम् ।
पत्कञ्ज-रूप-विजयं वर-काय-मारं,
रक्षाकरं रतिकरं नत-सूर-जातम् ॥ ६

तुष्टः प्रभो ! गुण-गणान्तर-वृत्त-वृत्त-
मुक्तावली-ग्रथित-माशु शिवैक-दानम् ।
देहीह मे त्वदभिधा स्फुट-नायकाग्रं,
दृष्ट्वा भवत्स्तवन-हार-मुदार-मेनम् ॥ ७

इति हारबन्ध-काव्यैर्मनोमतं मेऽद्य संस्तुतः पार्श्वः ।
विदधातु पूर्णचन्द्रस्सकल-समयसुन्दराम्भोधौ ॥ (गाथा) ८

पू.उपा. श्री समयसुन्दरगणिविरचितम्
चतुर्विंशतितीर्थङ्कर-गुरुनामगर्भितम्

## २८. ॥ श्रीपार्श्वनाथस्तवनम् ॥

वृषभ धुरन्धर उद्योतन वर, अजित विभो भुवि भुवन दिनेश्वर
वर्द्धमान गुणसार ।
वामा सम्भव पार्श्व जिनेश्वर, सुजन दशामभिनन्दन शशिकर
चन्द्र कमल पद चार ॥ १

जय सुमति लता घन अभयदेव सूरीन्द्र
पद्म प्रभु कर नत वल्लभ भक्ति मुनीन्द्र ।
वसु पार्श्व विगत मद दत्त भविक जन भन्द्र
चन्द्र प्रभु यशसा सुन्दर तर जिन चन्द्र ॥ २

सुविधिनाथ जिनपति मुदार मति शीतल वचनं
नौमि जिनेश्वर सूरि साधु कृत संस्तव रचनम् ।
श्रेयासं भविक प्रतिबोध निपुणं निस्तन्द्रं
श्री पार्श्व दे वासुपूज्य मानं जिनचन्द्रम् ॥ ३

विमलभं कुशलाम्बुज-भास्करं
प्रशमनं तत्पद्म दृशावरम् ।
नमत धर्म-सुलब्धि-विराजितं
जिनमशान्ति मुचंद्रविणोज्झितम् ॥ (द्रुत.वि.) ४

कुंथु रक्षाकरं विहितवृजिनोदयं,
अरतिचिताहरं राजमानास(श?)यम् ।
मल्लिका सहितभद्रासनस्थायिनं,
स्मरत मुनिसुव्रतं चंद्रहृदयं जिनम् ॥ (स्रग्विणी) ५

जय नमित सुरासुर गुण समुद्र
जय नेमि भवापह हंस मुद्र ।
जय पार्श्व कला माणिक्य गेह
जय वीर मनोहर चन्द्र देह ॥ (पुष्पिताग्रा) ६

इत्थं नीरधिनेत्रतीर्थपगुरुस्पष्टाभिधागर्भितं
सूर्याचाररसेन्दुसंवति नुतिं श्रीस्तम्भनस्य प्रभो ! ।
चक्रे श्रीजिनचन्द्रसूरिसुगुरुश्रीसिंहसूरिप्रभो !,
शिष्योऽयं समयादिसुन्दरगणिः सम्पूर्णचन्द्रद्युतेः ॥(शा.वि.)७

पू.उपा. श्री समयसुन्दरगणिविरचितम्

संस्कृत-प्राकृत-भाषामयम्

## २९. ॥ श्रीपार्श्वनाथाष्टकम् ॥

(भुजङ्गप्रयात)

भलूं आज भेट्युं प्रभोः पादपद्मम्,
फली आस मोरी नितान्तं विपद्मम् ।
गयूं दुःख नासी पुनः सौम्यदृष्ट्या,
थयुं सुख झाझुं यथा मेघवृष्ट्या ॥ १

जिके पार्श्व केरी करिष्यन्ति भक्ति,
तिके धन्य वारु मनुष्या प्रशक्तिम् ।
भली आज वेला मया वीतरागाः,
खुशी मांहिं भेट्या नमद्देवनागाः ॥ २

तुम्हे विश्व मांहे महा-कल्प-वृक्षा,
तुमे भव्य लोकां मनोभीष्ट-दक्षा ।
तुमे माय बाप प्रियाः स्वामि-रूपाः,
तुमे देव मोटा स्वयंभू स्वरूपाः ॥ ३

तुमारुं सदाई पदाम्भोज-देशं,
नमइ राय राणा यथा भानि भेशम् ।
रली रंग हूआ सतां पूरितेहं,
तुम्हा देव दीठा सुरोमाञ्च-देहम् ॥ ४

इसी वाणि मीठी तवातीव-मिष्टा,
घणी ठाम जोई मयानैव दृष्टा ।

सही बात साची बिना चंद्र-बिंबं,
कदे होइ नांही सुधाया: कदम्बम् ॥ ५

तुम्हारा गुणा री तुलां यो दधानः,
निको हूँ न देखूँ जगत्यां प्रधानः ।
डरै डूंगरे किं गुणैः सुन्दराणां,
धरी ओपमा एकदा मंदराणाम् ॥ ६

तुम्हारी बडाई नु को वक्तु-मीश,
कलिकाल माहे कवि-र्वागरीशः ।
कही एतली ए मया भूरि भक्त्या,
सदा पाय सेवूं तवातीव-शक्त्या ॥ ७

इति स्तुतिं सज्जन(प्राकृत?)-संस्कृताभ्यां,
तव प्रभो वार्तिक-संस्कृताभ्याम् ।
त्वत्पादपद्मः प्रणमत्पुरन्दरः,
श्री पार्श्व चक्रे समयादि सुन्दरः ॥ (उपजाति) ८

पू.उपा. श्री समयसुन्दरगणिविरचितम्

संस्कृतप्राकृतभाषामयम्

## ३०. ॥ श्रीपार्श्वनाथलघुस्तवनम् ॥

(भुजङ्गप्रयात)

लसण्णाण-विन्नाण-सन्नाण-मेहं,
कलाभिः कलाभिर्युतात्मीय देहम् ।
मणुण्णं कला-केलि-रूवाणुगारं,
स्तुवे पार्श्वनाथं गुण-श्रेणि-सारं ॥ १

सुआ जेण तुम्हाण वाणी सहेवं,
गतं तस्य मिथ्यात्व-मात्मीय-मेवम् ।
कहं चंद मज्झिल्ल-पीऊस-पाणं,
विषापोह-कृत्ये भवेन्न प्रमाणम् ॥ २

तुहप्पाय-पंके-रुहे जेअ भत्ता,
लभे ते सुखं नित्य-मेकाग्र-चित्ताः ।
कहं निप्फला कप्परुक्खस्स सेवा,
भवेत्प्राणिनां भक्तिभाजां सदेवा ॥ ३

तुहद्दंसणं जेअ पिक्खंति लोगा,
लसत्तोष-पोष लभंते सभोगाः ।
जहा मेह-रेहं पदट्ठूण मोरा,
यथा वा विधो दर्शनं सच्चकोराः ॥ ४

हवे जत्थ दिट्ठा जिणाणं पसन्ना,
गता तेभ्य आपन्नितान्तं निखिन्ना ।
पगासो सिया जत्थ सूरस्स सारं
कथं तत्र तिष्ठेत्कदाप्यन्धकारम् ॥ ५

तुमं नाम चिंतामणि जस्स चित्ते,
विभो कामितिस्तस्य संपत्ति-वित्ते ।
जओ पुप्फकालम्मि पत्तेणणेया,
वणस्सेणि पुष्पाग्र-माला-प्रमेया ॥ ६

मए वंदिया अज्ज तुम्हाण पाया,
नितान्त गता मेऽद्य सर्वेप्यपाया ।

जहा सुट्ठु दट्ठूण दुट्ठुं च मोरा,
भुजङ्गा व्रजेयुर्भियात्यंत-घोरा ॥ ७

अहो अज्ज मे वंछिअत्थस्समाला,
फलत्पार्श्वनाथ-प्रसादा-द्विशाला ।
जहा मेह-धाराभि-सित्ताण वीणा,
समृद्धा भवेत्किं न वल्ली न रीणा ॥ ८

इय पागय-भासाए संस्कृत-वाण्या च संस्तुतः पार्श्वः ।
भत्तस्स समयसुंदर-गणेर्मनो-वांछितं देयात् ॥ (गाथा) ९

पू.उपा.श्री यशोविजयविरचितम्

## ३१. ॥ श्रीशङ्खेश्वरपार्श्वजिनस्तोत्रम् ॥

(उपजाति)

अनन्तविज्ञानमपास्तदोषं महेन्द्रमान्यं महनीयवाचम् ।
गृहं महिम्नां महसां निधानं शङ्खेश्वरं पार्श्वजिनं स्तवीमि ॥१

महानुभावस्य जनुर्जनुष्मतां गुणस्तवैरेव दधाति हृद्यताम् ।
घनं वनं कान्तवसन्तसम्पदा पिकीरवैरेव समृद्धमीक्ष्यते ॥ २
(वंशस्थ)

अवर्ण्यसंवर्णनकश्मलाविलः स्वकार्यरक्तस्य कवेर्गिरां रसः ।
गुणस्तवैर्देव ! तवातिनिर्मलो भवत्यवश्यं कतकोत्करोपमैः ॥३
(वंशस्थ)

गुणास्त्वदीया अमिता इति स्तुता-
वुदासते देव ! न धीधना जनाः।

मणिष्वनन्तेषु महोदधेरहो न किं प्रवृत्तेरुपलम्भसम्भवः ? ॥४
(वंशस्थ)

भवद्‌गुणैरेव न चेदवेष्टयं स्वयं गिरं चित्रकवल्लिमुच्चकैः ।
तदा न किं दुर्जनवायसैरसौ
क्षणाद् विशीर्येत निसर्गभीषणैः ॥ (वंशस्थ) ५

न जानते नाथ ! यथा पथःस्थितिं प्रगल्भमानाश्च नृपानुपासते ।
श्रियं लभन्ते च विशृङ्खलाः खला
इतीदमुच्चैः कलिकालचेष्टितम् ॥ (वंशस्थ) ६

अमीषु तीर्थेश ! खलेषु यत् पटु-
र्भवद्‌भुजिष्यस्तदिहासि कारणम् ।
हविर्भुजां हेतिषु यन्न दह्यते करः परस्तत्र गुणो महामणेः ॥७
(वंशस्थ)

कलौ जलौघे बहुपङ्कसङ्कुरे गुणव्रजे मज्जति सज्जनार्जिते ।
प्रभो ! वरीवर्ति शरीरधारिणां
तरीव निस्तारकरी तव स्तुतिः ॥ (वंशस्थ) ८

खलैः किमेतैः कलिकाललालितै-
र्विपश्चितां नाथ ! यदि प्रसीदसि ।
पराक्रमः कस्तमसां महीयसां
तनोति भासं महसां पतिर्यदि ॥ (वंशस्थ) ९

अमूढलक्ष्यत्वमिहेश ! दुर्जने न सम्यगब्धाविव तत्त्वचालनम् ।
कथा नु कोलाहलतां विगाहते
ततः कथं नाथ ! बुधः प्रवर्तताम् ॥ (वंशस्थ) १०

यथा पथा यात्युपमृद्य कण्टकान्
जनो मनोऽभीहितबद्धलालसः ।
त्वदाज्ञया देव ! निहत्य दुर्जनान्
तथा विधेयैव कथा विपश्चिता ॥ ११

संवादसारा भवदागमा यज्जगच्चमत्कारकराः स्फुरन्ति ।
उच्छृङ्खलानां नियतं खलानां मुखे मषीलेपमहोत्सवोऽसौ ॥१२

भवन्तमुत्सृज्य विलीनरागं परं भजन्ते स्वहितार्थिनो ये ।
तेषां वयं देव ! सचेतनानां विद्मो विशेषं किमचेतनेभ्यः ॥१३

मोहावृतानामपि शास्त्रपाठो हहा महानर्थकरः परेषाम् ।
रागैकलुब्धस्य हि लुब्धकेभ्यो वधाय नूनं हरिणस्य कर्णौ ॥१४

शमो दमो दानमधीतिनिष्ठा वृथैव सर्वं तव भक्तिहीनम् ।
भावक्रियां नैव कविप्रबन्धो रसं विना यच्छति चारुबन्धः ॥१५

अन्तर्मुहूर्तं विहितं तपोऽपि त्वदाज्ञया देव ! तमस्तृणेढि ।
विना तु तां हन्त ! युगान्तराणि
कथापि न क्लेशकृतां शिवस्य ॥ १६

अज्ञानजं बन्धनमङ्गभाजां ज्ञानं विना देव ! कथं व्यपैति ।
अघर्मजं जाड्यमुपैति नाशं न घर्मरश्मेर्हि विना प्रतापम् ॥१७

न ज्ञानमात्रादपि कार्यसिद्धिर्विना चरित्रं भवदागमेऽस्ति ।
अपीक्षमाणः पदवीं न पङ्गुर्विना गतिं हन्त ! पुरं प्रयाति ॥१८

(उपेन्द्रवज्रा)

संसारसिन्धाविह नास्ति किञ्चिदालम्बनं देव ! विना त्वदाज्ञाम्।
तया विहीनाः परकष्टलीना हहा महामोहहताः पतन्ति ॥ १९

महौषधी जन्मजरामयानां महार्गला दुर्गतिमन्दिरस्य ।
खानिः सुखानां कृतकर्महानि-
राज्ञा त्वदीयास्ति जिनेन्द्रचन्द्र ! ॥ २०

रागं च कोपं च न नाथ ! धत्से,
स्तुत्यस्तुतीनां च फलं प्रदत्से ।
लोकोत्तरं किञ्चिदिदं त्वदीयं
शीलं समाशीलितविश्वलीलम् ॥ (इन्द्रवज्रा) २१

त्वद्ध्यानबद्धादरमानसस्य त्वद्योगमुद्राभिनिविष्टबुद्धेः ।
तवोपदेशे निरतस्य शश्वत् कदा भविष्यन्ति शमोत्सवा मे ॥२२

अकुर्वतः सम्प्रति लब्धबोधिं समीहमानस्य परां च बोधिम् ।
न साम्प्रतं किञ्चन साम्प्रतं तद् दयस्व दीनं परमार्थहीनम् ॥२३
(उपेन्द्रवज्रा)

निर्वेदमुख्यं च भवन्तमेव नाथन्ति नाथं यतयो न चान्यम् ।
सुधार्थमुच्चैर्विबुधाः सुधांशुं नाथन्ति नान्यं ग्रहमप्युदारम् ॥२४

त्वत्तो न तीर्थेश ! परः कृपालुर्मत्तः कृपापात्रमपीह नान्यः ।
अतोऽस्ति योग्योऽवसरः कृपाया
ब्रुवे किमन्यज्जगदीशितारम् ॥ २५

अथास्ति चेदेष जनः समन्तुस्तथाप्यहो ! ते किमुपेक्षणीयः ? ।
सकण्टकं किं न सरोजखण्डमुन्मीलयत्यंशुभिरंशुमाली ॥ २६

कृपावतां न स्वकृतोपकारे सदोषनिर्दोषविचारणास्ति ।
समं घनः सिञ्चति काननेषु निम्बं च चूतं च घनाभिरद्भिः ॥२७

मुखं प्रसन्नं हसितेन्दुबिम्बं नेत्रे कृपार्द्रे जितपद्मपत्रे ।
पद्मासनस्था च तनुः प्रशान्ता न योगमुद्रापि तवाप्युतान्यैः ॥२८

त्वद्योगमुद्रामपि वीक्षमाणाः प्रशान्तवैराः पुरुषा भवन्ति ।
विशिष्य वक्तुं कथमीश्महे तत् तवान्तरङ्गं प्रशमप्रभावम् ॥२९

मूर्तिस्तव स्फूर्तिमती जनार्तिविध्वंसिनी कामितचित्रवल्ली ।
विश्वत्रयीनेत्रचकोरकाणां तनोति शीतांशुरुचां विलासम् ॥ ३०

फणामणीनां घृणिभिर्भुवीश ! मूर्तिस्तवाभाति विनीलकान्तिः ।
उद्भिन्नरक्ताभिनवप्रवालप्ररोहमिश्रेव कलिन्दकन्या ॥ ३१

तवेश ! मौलौ रुचिराः स्फुरन्ति फणाः फणीन्द्रप्रवरस्य सप्त ।
तमोभरं सप्तजगज्जनानां धृता निहन्तुं किमु सप्त दीपाः ॥ ३२

(उपेन्द्रवज्रा)

त्वन्मौलिविस्फारफणामणीनां भाभिर्विनिर्यत्तिमिरासु दिक्षु ।
स्वकान्तिकीर्तिप्रशमात् प्रदीपाः
शिखामिषात् खेदमिवोद्गिरन्ति ॥ ३३

ध्यानानले सप्तभयेन्धनानि हुतानि तीव्राभयभावनाभिः ।
इतीव किं शंसितुमीश ! दध्रे
मौलौ त्वया सप्तफणी जनेभ्यः ॥ ३४

अष्टापि सिद्धीर्युगपत् प्रदातुं किमष्ट मूर्त्तीस्त्वमिहानतानाम् ।
सप्तस्फुरद्दीप्तफणामणीनां क्रोडेषु सङ्क्रान्ततनुर्दधासि ॥ ३५

यद्येकनालानि समुल्लसेयुः सरोवरे कोकनदानि सप्त ।
तदोपमीयेत तवेश ! मौलौ तैरुच्चकैः सप्तफणी प्रदीप्रा ॥ ३६

भवेषु तीर्थेश ! चतुर्षु सारं मानुष्यकं यत्र तवास्ति सेवा ।
श्लाघ्यो हि शैलेषु सुमेरुरेव यत्राप्यते कल्पमहीरुहश्रीः ॥ ३७

नृजन्म दुःखैकगृहं मुनीन्द्रैः प्रशस्यते त्वत्पदसेवयैव ।
सौरभ्यलोभात् सुधियः फणीन्द्रैरप्यावृतं चन्दनमाद्रियन्ते ॥३८

अवाप्य मानुष्यकमप्युदारं न येन तेने तव देव ! सेवा ।
उपस्थिते तेन फले सुरद्रोः करार्पणालस्यमकारि मोहात् ॥३९
(उपेन्द्रवज्रा)

जनुर्मनुष्यस्य दिवः शतेन क्रीणामि चेन्नास्मि तदाप्यविज्ञः ।
यत्र त्वदाज्ञाप्रतिपत्तिपुण्यादमुत्र तज्जैत्रमहोदयाप्तिः ॥ ४०

स्तोमैः सुमानां तव देव ! पूजा पूज्यत्वहेतुर्जगतां जनानाम् ।
भवत्तनौ स्नात्रजलाभिषेकः साक्षादयं पुण्यसुरद्रुसेकः ॥ ४१

गुणैस्त्वदीयैर्ग्रथितां स्तुतिस्रजं
स्वयं च ये कण्ठगतां वितन्वते ।
अभङ्गसौभाग्यवशीकृता इव
श्रियो वरीतुं परितो भ्रमन्त्यमुम् ॥ (वंशस्थ) ४२

विनोदवत् त्वन्नुतिगोचरं मनो-घनोत्सवे मन्नयने त्वदीक्षिणी ।
त्वदङ्घ्रिनम्रो मम मौलिरालयः
श्रियः प्रियस्त्वज्जपविस्तरःकरः ॥ (वंशस्थ) ४३

त्वदास्यसंवीक्षणशर्मवञ्चिते नयोज्झितानां नयने निरर्थके ।
भवत्कथाकर्णनरागहीनयो-
र्न भारतोऽन्यत् फलमस्ति कर्णयोः ॥ (वंशस्थ) ४४

पुष्पाणि पाणिर्न ललौ यदीयस्त्वदीयपूजाविधये प्रमादात् ।
अमुष्य दूरे भवदुःखहानिर्भाग्योज्झितस्येव सुवर्णखानिः ॥४५

भूयासमिन्द्राच्र्य ! भवद्भुजिष्यस्तव क्रमाम्भोजमधुव्रतः स्याम्।
वहेय मौलौ परमां त्वदाज्ञां स्तवे भवेयं तव सावधानः ॥ ४६

त्वमीशिताहं तव सेवकश्चेत् ततः परा का पदवी विशिष्टा ? ।
समेधमानेऽत्र हि सन्निकर्षे पुरन्दरर्द्धिः प्रथते पुरस्तात् ॥ ४७

(उपेन्द्रवज्रा)

(वंशस्थ)

परेषु दोषास्त्वयि देव ! सद्गुणा
मिथोऽवलेपादिव नित्यमासते ।
स्फुरन्ति नेन्दावपतन्द्रचन्द्रिका-
स्तमोभरा वा किमु सिंहिकासुतेः ॥ ४८

विशङ्कमङ्के दधते विलासिनीर्विशिष्टमिच्छन्ति च देवतायशः ।
परे तदेते ज्वलता हविर्भुजा वितन्वते तापसमापनार्थिताम् ॥४९

कुदृष्टिभिर्देवतया श्रितेषु वा परेषु दोषोऽस्ति न नाम कश्चन ।
न मूढरूप्यभ्रमभाजनेष्वपि प्रवर्तते रङ्गणेषु दुष्टता ॥ ५०

सरागता चेज्जिनदेवमाश्रयेत् तमस्तदा तिग्मरुचं पराभवेत् ।
विरागता वा यदि तं न संश्रयेत्
तदा प्रकाशोऽपि न भानुमालिनम् ॥ ५१

गवां विलासास्तव देव ! भास्वत-
स्तमोभरं घ्नन्ति भुवि प्रसृत्वरम् ।
अशेषदोषोपशमैकवृत्तयः प्रकाशमन्तः परमं प्रकुर्वते ॥ ५२

इदं महच्चित्रमहीनजातिजोऽप्युदग्रभोगप्रसरात् पराङ्मुखः ।
जनार्दनायोगकृतप्रसिद्धिभाग् न वैनतेयश्रियमातनोऽसि न ॥५३

जिनाऽसहायेन विनिर्जितक्रुधा
विना जिगीषां च विना रणोत्सवम् ।
त्वया जितं यद् द्विषतां कदम्बकं
जगज्जनानन्दकरं न किन्नु तत् ॥ ५४

उपेक्षमाणोऽप्युपकृत्य कृत्यविज्जगत्त्रयीं यद् दुरितादधीधरः ।
परः सहस्रा अपि हन्त ! तत्परे
यशो न शोद्धुं निरताः प्रतारकाः ॥ ५५

हरेः समीपे हरिणा यदासते स्फुरन्ति नागाः पुरतो गरुत्मतः ।
अयं प्रभावस्तव कोऽप्यनुत्तरो
विपश्चितां चेतसि हर्षवर्षदः ॥ ५६

अलौकिकी योगसमृद्धिरुच्चकैरलौकिकं रूपमलौकिकं वचः ।
न लौकिकं किञ्चन ते समीक्ष्यते
तथापि लोकत्वधिया हताः परे ॥ ५७

विनैव दानं ततदानकीर्तये विना च शास्त्राध्ययनं विपश्चिते ।
विनानुरागं भवते कृपावते जगज्जनान्दकृते नमो नमः ॥ ५८

स्मरापहस्याप्यभवस्य विस्फुरत्सुदर्शनस्याप्यजनार्दनस्य च ।
न नाभिजातस्य तवातिदुर्वचं स्वरूपमुच्चैः कमलाश्रयस्य ॥५९

चतुर्मुखोऽङ्गीकृतसर्वमङ्गलो विराजसे यन्नरकान्तकारणम् ।
विरञ्चिगौरीशमुकुन्दसञ्ज्ञिता
सुरत्रयी तत् त्वयि किं न लीयते ॥ ६०

वृथा कथासौ परदोषघोषणैस्तव स्तुतिर्विश्वजनातिशायिनः ।
प्रसिद्धिहीनादनपेक्ष्य तुल्यतां भवेदलीकातिशयान्न वर्णना ॥६१

अलं कलङ्कैर्भणितैः परेषां निजैर्गुणैरेव तवास्ति शोभा ।
महोभरैरेव तव प्रसिद्धिः पतङ्गनिन्दानिकरैः किमस्य ? ॥६२

कृतप्रसर्पद्रथचक्रचूर्णितक्षमारजःकैतवपापचूर्णनैः ।
अनारतं त्वं जिन ! सङ्घनायकै-
रुपास्यसे मङ्गलनादसादरैः ॥ ६३

स्त्रियः प्रियध्वानमुपेत्य तन्वते तथा पुरस्ते जिन ! सङ्घसङ्गताः ।
यथा तदाकर्णनजातविस्मया
भवन्ति सर्वाः स्तिमिताः सुरप्रियाः ॥ ६४

प्रियस्वनैः सङ्घजनैस्त्वदालयप्रदक्षिणादानपरायणैर्घनैः ।
महान्तरीपं परितः प्रसृत्वरा अनुक्रियन्ते जलधेर्महोर्मयः ॥६५

मृदङ्गवेणुध्वनिभिर्विसृत्वरैः समुच्छलत्पञ्चममूर्छनाभरैः ।
अनारतं सङ्घवृते त्वदालये शिवश्रियो नृत्यविधिर्विजृम्भते ॥६६

जगज्जनानन्दन ! चन्दनद्रवैस्त्वदङ्गमभ्यर्च्य ससान्द्रकुङ्कुमैः ।
कथं भजन्ते भुवि सङ्घमानवाः
समग्रतापप्रशमेन निर्वृतिम् ? ॥ ६७

अवेक्ष्य धूमं तव चैत्यमूर्धनि प्रसर्पिकृष्णागुरुधूपसम्भवम् ।
समुन्नमन्मेघधिया कलापिना-
मुदेत्य विश्रान्तमकाण्डताण्डवम् ॥ ६८

वनं यथा पुष्पभरेण पावनं ग्रहव्रजैर्वा गगनं प्रकाशिभिः ।
तथा सदा सङ्घजनैरलङ्कृतै-
र्विराजते त्वद्भवनं श्रिया घनम् ॥ ६९

प्रसारयेत् कः पुरतः स्वपाणी कल्पद्रुमस्य त्वयि दानशौण्डे ?।
काष्ठत्वसंसर्गजदोषजास्य
श्रुता हि लीनालिमिषात् कुकीर्तिः ॥ (उपजाति) ७०

लब्ध्वा भवन्तं विदितं वदान्यं याचेत चिन्तामणिमादृतः कः ?।
विधोरिवाङ्केन महस्विनोऽपि
पाषाणभावेन दितं यशोऽस्य ॥ (उपजाति) ७१

अभ्यर्थनीयाऽपि न कामधेनुः प्रसद्य सद्यो ददति त्वयीश ! ।
इयं पशुर्नाकिमनो धिनोतु पयोभरैरेव न दानकीर्त्या ॥ ७२
(उपजाति)

न पाटवं कामघटस्य दाने भिदेलिमस्योपलतः क्षणेन ।
सदा प्रदानोत्सवकान्तकीर्त्तिं
विहाय तत्त्वां सजतीह को वा ? ॥ ७३
(उपजाति)

त्वत्तः प्रसीदन्ति हि कामधेनुकल्पद्रुचिन्तामणिकामकुम्भाः ।
त्वदप्रसत्तौ च तदप्रसत्तिरिति त्वमेवासि बुधैर्निषेव्यः ॥ ७४
(उपजाति)

कायप्रयासेन निषेव्यमाणाश्चिरं नृपाः स्वल्पकृपा भवन्ति ।
भवांस्तु भक्त्यैव तनोति सर्वमनोरथान् इत्यखिलातिशायी ॥७५
(उपजाति)

स्वर्गापवर्गार्पणसावधानं त्वां याचते वैषयिकं सुखं कः ? ।
कल्पद्रुमं को बदरीफलानि याचेत वा चेतनया विहीनः ॥७६
(इन्द्रवज्रा)

त्वदीयसेवा विहिता शिवार्थं ददाति भोगानपि चानुषङ्गात् ।
कृषीवलाः शस्यकृते प्रवृत्ताः पलालजालं त्वनुषङ्गसङ्गि ॥७७
(उपेन्द्रवज्रा)

(वंशस्थ)

सितोपला त्वद्वचसा विनिर्जिता तृणं गृहीत्वा वदने पलायिता ।
क्षणादसङ्कुच्यत हारहूरया
ततस्त्र(त्र)पानिर्गतकान्तिपूरया ॥ ७८

रसैर्गिरस्ते नवभिर्मनोरमाः सुधासु दृष्टा बहुधापि षड् रसाः ।
अतोऽनयोः कः समभावमुच्चरेद्
वरेण्यहीनोपमितिर्विडम्बना ॥ ७९

तृणैकजात्येषु यदल्पसारता विचक्षणैरिक्षुषु दिक्षु गीयते ।
समग्रसारा तव भारती ततः कथं तदौपम्यकथाप्रथाऽसहा ॥८०

भवद्वचःपानकृतां न नाकिनां सुरद्रुमाणां फलभोगनिष्ठता ।
द्विधाप्यमीषां न ततः प्रवर्तते फलैस्त्रपाभिश्च न भारनम्रता ॥८१

प्रकाममन्तःकरणेषु देहिनां वितन्वती धर्मसमृद्धिमुच्चकैः ।
चिरं हरन्ती बहु पङ्कसङ्करं सरस्वती ते प्रथते जगद्धिता ॥८२

स्फुरन्ति सर्वे तव दर्शने नयाः पृथग् नयेषु प्रथते न तत् पुनः ।
कणा न राशौ किमु कुर्वते स्थितिं
कणेषु राशिस्तु पृथग् न वर्तते ॥ ८३

स्वतः प्रवृत्तैर्जिन ! दर्शनस्य ते
मतान्तरैश्चेत् क्रियते पराक्रिया ।

तदा स्फुलिङ्गैर्महतो हविर्भुजः
कथं न तेजःप्रसरत् पिधीयते ? ॥ ८४

स्फुरन्नयावर्तमभङ्गभङ्गतरङ्गमुद्यत्पदरत्नपूर्णम् ।
महानुयोगह्रदिनीनिपातं भजामि ते शासनरत्नराशिम् ॥ ८५
(उपेन्द्रवज्रा)

तवोपदेशं समवाप्य यस्माद् विलीनमोहाः सुखिनो भवामः ।
नित्यं तमोराहुसुदर्शनाय नमोऽस्तु तस्मै तव दर्शनाय ॥ ८६
(उपजाति)

न नाम हिंसाकलुषत्वमुच्चैः श्रुतं न चानाप्तविनिर्मितत्वम् ।
परिग्रहो नो नियमोज्झितानामतो न दोषस्तव दर्शनेऽस्ति ॥८७
(उपेन्द्रवज्रा)

'महाजनो येन गतः स पन्था' इति प्रसिद्धं वचनं मुनीनाम् ।
महाजनत्वं च महाव्रतानामतस्तदिष्टं हि हितं मतं ते ॥ ८८
(उपेन्द्रवज्रा)

समग्रवेदोपगमो न केषुचित्
क्व चित् त्वसौ बुद्धसुतेऽपि वृत्तिमान् ।
अशेषतात्पर्यमति प्रसञ्जकं ततोऽपुनर्बन्धकतैव शिष्टता ॥ ८९
(वंशस्थ)

न वासनायाः परिपाकमन्तरा नृणां जडे तादृशतेति सौगताः ।
न कापिलास्तु प्रकृतेरधिक्रिया-
क्षयं तथा भव्यतयेति ते गिरः ॥ (वंशस्थ) ९०

इहापुनर्बन्धकभावमन्तरा बिभर्ति वाणी तव कर्णशूलताम् ।
विना किमारोग्यमतिं ज्वरोदये
न याति मिष्टान्नततिर्विषात्मताम् ॥ (वंशस्थ) ९१

शास्त्राणि हिंसाद्यभिधायकानि यदि प्रमाणत्वकथां भजन्ते ।
हविर्भुजः किं न तदातितीव्राः पीयूषसाधर्म्यमवाप्नुवन्ति ॥९२
(उपजाति)

विधाय मूर्धानमधस्तपस्यया किमुच्चमन्त्रव्रतशीलशीलनैः ।
श्रुतं न शङ्खेश्वरनाम विश्रुतं
किमत्र विद्याव्रजबीजमुज्ज्वलम् ॥ (वंशस्थ) ९३

मदाम्बुलुभ्यद्भ्रमरारवेण प्रवृद्धरोषं गिरितुङ्गकायम् ।
अश्रान्तमान्दोलितकर्णतालं प्रोन्मूलयन्तं विपिनं विशालम् ॥९४
(उपजाति)

करप्रहारैः कुलिशानुकारैः सन्त्रासयन्तं बहुवन्यजन्तून् ।
अभ्यापतन्तं द्विरदं निरीक्ष्य
भियं जनास्त्वच्छरणा न यान्ति ॥ (यु.) (उपजाति) ९५

विदीर्णदन्तिव्रजकुम्भपीठव्यक्तक्षरद्रक्तरसप्रसक्तम् ।
गिरिप्रतिध्वानकरैः प्रणादैर्विध्वंसयन्तं करिणां विनोदम् ॥९६
(उपजाति)

अतुच्छपुच्छस्वनवारबिभ्यद्वराहमातङ्गचमूरुयूथम् ।
मृगारिमुद्वीक्ष्य न शङ्कते ते
नाम स्मरन् नाथ ! नरो नितान्तम् ॥ (यु.) (उपजाति) ९७

तमालहिन्तालरसालतालविशालसालव्रजदाहधूमैः ।
दिशः समस्ता मलिना वितन्वन्
दहन्निवाभ्रं प्रसृतैः स्फुलिङ्गैः ॥ (उपेन्द्रवज्रा) ९८

मिथो मिलज्जालजटालमूर्तिर्दवानलो वायुजवात् करालः ।
त्वदीयनामस्मरणैकमन्त्राद् जलायते विश्वजनाभिवन्द्य ! ॥९९
(यु.) (उपेन्द्रवज्रा)

स्फुरत्फणाडम्बरभीमकायः फूत्कारभारैरुदयद्विषायः ।
उल्लालयन् क्रूरकृतान्तदंष्ट्राद्वयाभजिह्वायुगलं प्रकोपात् ॥ १००
(उपजाति)

पापाणुभिः किं घटितः पयोदश्यामः फणीन्द्रस्तव नाममन्त्रात् ।
भृशं विशङ्कं व्रजतां समीपे
न भीतिलेशं तनुते नराणाम् ॥ (यु.) (उपजाति) १०१

भटासिभिन्नद्विपकुम्भनिर्यन्मुक्ताफलैस्तारकिताभ्रदेशे ।
धनुर्विमुक्तैः शरकाण्डवृन्दैः प्रदर्शिताकाण्डतडिद्विलासे ॥१०२
(उपजाति)

रणाङ्गणे धीरमृगारिनादैः पलायमानाखिलभीरुलोके ।
जयं लभन्ते मनुजास्त्वदीयपदाब्जसेवाप्रथितप्रसादाः ॥ १०३
(यु.) (उपेन्द्रवज्रा)

उत्तालभूयः पवमानवेगादुल्लोलकल्लोलसहस्रभीष्मे ।
समुच्छलत्कच्छपनक्रचक्रसङ्घट्टनाभङ्गुरयानपात्रे ॥ १०४
(उपजाति)

पतन्महाशैलशिलारवेण गलत्प्रमीलीकृतपद्मनाभे ।
श्रियं लभन्ते भवतः प्रभावात्
सांयात्रिका वीतभियः पयोधौ ॥ (यु.) (उपजाति) १०५

जलोदरा दत्तदरा न जातु ज्वराः प्रशान्तप्रसरा भवन्ति ।
न पुष्टतां कुष्टरुजः प्रमेहा
विदीर्णदेहा न समुद्भव(वह)न्ति ॥ (उपेन्द्रवज्रा) १०६

भगन्दरः प्राणहरः कथं स्यात् क्षणाद् व्रणानां क्षयमेति पीडा ।
ब्रूमः किमन्यत् तव नाममन्त्राद्
रुजः समस्ता अपि यान्ति नाशम् ॥ (यु.) (उपजाति) १०७

आपादकण्ठार्पितशृङ्खलौघै र्व्रणैर्विशीर्णाः प्रतिगात्रदेशम् ।
व्यथावशेन क्षणमप्यशक्ता
उच्छ्वासमुल्लासयितुं समन्तात् ॥ (उपजाति) १०८

दशामवाप्ता भृशशोचनीयां विमुक्तरागा निजजीवितेऽपि ।
नरा जपन्तस्तव नाममन्त्रं
क्षणाद् गलद्बन्धभया भवन्ति ॥ (यु.) (उपेन्द्रवज्रा) १०९

इत्यष्टभीतिदलनप्रथितप्रभावं नित्यावबोधभरबुद्धसमग्रभावम् ।
विश्वातिशायिगुणरत्नसमूहधाम !
त्वामेव देव ! वयमीश्वरमाश्रयामः ॥ (वसन्ततिलका) ११०

जिन ! कृपाढ्य ! भवन्तमयं जनस्त्रिजगतीजनवत्सल ! याचते।
प्रतिभवं भवतो भवतात् कृपा-
रसमये समये परमा रतिः ॥ (द्रूतविलम्बित) १११

प्रणम्रहरिमण्डलीमुकुटनीलरत्नत्विषां
स्वकीयदशनत्विषामपि मिथः प्रसङ्गोत्सवे ।
सृजन्निव कलिन्दजा सुरतरङ्गिणीसङ्गमं
भवान् भवतु भूतये भवभृतां भवत्सेविनाम् ॥ (पृथ्वी) ११२

इति जिनपतिर्भूयो भक्त्या स्तुतः शमिनामिन-
स्त्रिदशहरिणीगीतस्फीतस्फुरद्गुणमण्डलः ।
प्रणमदमरस्तोमः कुर्याज्जगज्जनवाञ्छित-
प्रणयनपटुः पार्श्वः पूर्णां यशोविजयश्रियम् ॥ (हरिणी) ११३

पू.उपा.श्री यशोविजयविरचितम्

## ३२. ॥ श्रीशङ्खेश्वरपार्श्वनाथस्तोत्रम् ॥

(उपजाति)

ऐँकाररूपां प्रणिपत्य वाचं, वाचंयमव्रातकृतांह्रिसेवम् ।
जनुःपुपूर्षुर्दुरितं जिहासुः, शङ्खेश्वरं पार्श्वजिनं स्तवीमि ॥ १

अप्येकमीशं जगतां भवन्तं, विहाय ये नाम परं भजन्ते ।
कुपक्षिणस्ते ननु पारिजात-स्रजं भजन्ते न करीरसक्ताः ॥ २

आहार्यदेवान् भजतां सरागाँ-स्त्वद्द्वेषिणां चेतसि या मुमुक्षा ।
अज्ञानभाजां किल सा जनानां, तृषत्यर्थिनां शैलशिलाबुभुक्षा ॥३
(इन्द्रवज्रा)

परेषु देवत्वमुपेत्य देव !, मूढा विमूढेषु हितार्थिनो ये ।
आरोपितादित्यगुणेन तेषां, खद्योतपोतेन कृतार्थताऽस्तु ॥ ४

त्वद्दर्शनाय स्वहितार्थिनोऽपि, द्रुह्यन्ति ये नाम जिनेश ! मूढाः ।
मोहेन पीयूषमपि त्यजद्भिः, पिपासुभिस्ते सह तोलनीयाः ॥५

त्वत्सेविनां दैशिकशासनेभ्यो, ये नाम वाचं न विशेषयन्ति ।
जागर्तु तेषां भृशमन्धकार-प्रकाशयोरप्यविशेषबुद्धिः ॥ ६

दुर्नीतयः शान्तरसं स्रवन्तीं, ये सप्तभङ्गीं तव नाद्रियन्ते ।
पिपासवस्ते पतिताः कृशानौ, हता हता एव हहा हताशाः ॥७

विधिं निषेधं च दिशन् जनेभ्यो, जगज्जगन्नाथ ! पितेव पासि ।
चित्रं तथापि स्वपितामहादीन्,
त्वां निह्नुवन्तोऽपि न निह्नुवन्ति ॥ ८

वसुन्धरां नीरभरेण सिञ्चन्, यथोषरानूषरयोः पयोमुक् ।
असत्सतोरन्यतरत्र नैव,
तथोपदेशस्तव पक्षपाती ॥ (उपेन्द्रवज्रा) ९

महीसिचः पङ्ककृतः पयोदा-द्धर्मं दिशन्देव ! विलक्षणोऽसि ।
यथा यथा सिञ्चसि भव्यचेत-स्तथा तथा पङ्कमपाकरोषि ॥१०

स्फुटे विनिर्णेतरि देवदेव !, सन्देग्धि यस्त्वय्यपि जागरूके ।
निमील्य चक्षुः स घटाद्यपश्यन्,
प्रदीपवृन्दैरपि किं करोतु ॥ ११

सोऽयं मया ध्यानपथोपनीतः, केनाऽपि रूपेण चिरन्तनेन ।
भवभ्रमघ्नो मम देवदेव !, प्रणम्रदेवेन्द्र ! चिराय जीयाः ॥१२

अलोकलोकव्यतिवृत्तिदक्षा, शक्तिस्त्वदीया समये स्मृता या ।
अस्मादृशां सा सहतामपायं,
भेत्तुं क्षणार्द्धेऽपि कथं विलम्बम् ॥ १३

प्रश्ने परेषां यदधीष्टदेश्यं, त्वमेव देवो मम वक्तुमर्हः ।
ततोऽस्य भक्तस्य समीहितार्थं,
पद्मावतीभोगिपती क्रियेताम् ॥ १४

अदाः सदा नम्रसुरासुरेश !, प्रसूनमालां किल यां मनस्वी ।
त्वत्किङ्करस्यास्य तयैव विश्वे,
प्रकाश्यतां देव ! चिरं जयश्रीः ॥ १५

कथाश्लथासत्यपथः परीक्षा, परीक्षकाणां हृदये निलीना ।
कलौ कुपक्षग्रहिलप्रतापे, त्वत्किङ्कराणां शरणं त्वमेव ॥ १६

औदास्यभागेव तुलां दधाने, खद्योतपोते द्युतिमालिनो या ।
कलौ गलद्बुद्धिपरीक्षकाणां,
तां चातुरीं देव ! वयं न विद्मः ॥ १७

कवेः सभायां कुपरीक्षकाणा-मधिक्रियापि स्फुटधिक्क्रियैव ।
बकस्य पङ्क्तौ वसतो न किं स्यात्,
मरालबालस्य महोपहासः ॥ (उपेन्द्रवज्रा) १८

कण्ठीरवा एव कुपन्थिनागे, भवत्प्रसादाद्वयमुद्धताः स्मः ।
स्याद्वादमुद्रारहिताः कुतीर्थ्याः, श्रृगालबाला इव नाद्रियन्ते ॥१९

याचामहे देव ! तवैव भूयः, कृपाकटाक्षेण कृतार्थभावम् ।
जरानिहन्ता किल यादवानां, दासं दृशैनं प्रविलोकयस्व ॥२०

प्रत्यक्षलक्ष्यामिव कल्पवल्लीं, तवापि मूर्त्तिं किल यो न मेने ।
स्वबोधिबीजस्य जिनेश ! तेन,
न्यधायि कण्ठे कठिनः कुठारः ॥ २१

नयानविज्ञाय जिनेश ! किञ्चिदभ्यस्य येषां तव वाग्बुभुत्सा ।
द्रुतं रुताभ्यासकृतां तु तेषां,
पिकस्वरेच्छा किल वायसानाम् ॥ २२

एकत्र वस्तुन्यऽभिदीर्णशेषं, कुपक्षिणां यः किल पक्षपातः ।
स एव तीर्थेश ! परानुयोगे, मतिच्छिदायाः परमं निदानम् ॥२३

भिन्दन्ति तत्त्वानि भिदाप्रतीतिं, निदानमासाद्य कुवादिनो ये ।
संख्यामनासाद्य विहाय भूमीं,
विहायसि स्थातुममी धृताशाः ॥ २४

येऽपि प्रकामं प्रतिजानतेऽज्ञा, जगज्जिनैकान्तत एकमेव ।
जारं च सत्यं पितरं च तेऽपि, समानबुद्ध्यैव समाश्रयन्तु ॥२५

अभिन्नभिन्नं तु नयैरशेषै-रदीदृशः साधु तथा पदार्थम् ।
दोषाख्यया नाथ ! यथाश्रयन्ते,
त्वद्द्वेषिणो वाततयोद्द्विषां वा (षन्तः) ॥ २६

पदार्थगान् पर्यनुयोगयोग्यान्, ससापि भङ्गान् विभनक्ति भाषा ।
तथा तवाधीश ! यथा कथायां, शङ्कासमाधीरपरे लभन्ते ॥२७

जिह्वासहस्त्रं जिनराज ! युष्म-द्गुणान्न संख्यातुमलं यदासीत् ।
सहस्त्रजिह्वोऽपि ततः स्वनाम्ना,
द्विजिह्व इत्येव जनैः प्रतीतः ॥ २८

जङ्घालभावं कलयन्नशेषं नभो जिनाक्रामति यः क्रमाभ्याम् ।
अशासनैस्त(नः सोऽ)स्य पदं निदध्याद्,
वक्तुं विशेषं तव सर्ववाचाम् ॥ २९

प्रणम्रदेवेन्द्रशिरःकिरीट-रत्नद्युतिद्योतितदिग्विभागः ।
अस्मन्मनोवाञ्छितपूरणायां,
कल्पद्रुकल्पः कुशलाय भूयाः ॥ ३०

हितार्थिना सम्प्रति सम्प्रतीतः, संस्तूयसे यच्छिवशर्मदाने ।
तेनैव तीर्थेश ! भवे भवेऽस्तु, भवत्पदाम्भोरुहभृङ्गभूयम् ॥३१

इत्थं श्रीशङ्खेश्वर-पार्श्वनाथः प्रणतलोकहितदाता ।
स्तुतिपन्थानं नीतः, यशोविजयसम्पदं तनुताम् ॥ ३२

अध्ययनाध्यापनयुग्-ग्रन्थकृतिप्रभृतिसर्वकार्येषु ।
श्रीशङ्खेश्वरमण्डन !, भूया हस्तावलम्बी मे ॥ ३३

पू.उपा.श्री यशोविजयविरचितम्

## ३३. ॥ श्रीशङ्खेश्वरपार्श्वनाथस्तोत्रम् ॥

(उपजाति)

ऐँकाररूपस्मरणोपनीतां, कृतार्थभावं धियमानयामि ।
समूलमुन्मूलयितुं रुजः स्वाः, संस्तूय शङ्खेश्वरपार्श्वनाथम् ॥ १

भवद्गुणानां गणनां विधातुं, पुरन्दरोऽपि प्रभुरेव न स्यात् ।
तथापि निःशङ्कतया प्रवृत्तेः(त्तिः),
यत्तत्र हेतुर्निजकार्य(र्थ)लोभः ॥ २

यः कार्यमासाद्य महान्तमीशं, न याचते नाम निजानुरूपम् ।
रत्नानि वर्षत्यपि वारिवाहे, स पाणिदाने क्ष(कृ)पणत्वमेति ॥३

त्वयि प्रभौ पूरयति प्रकामं, मुहुर्मनःप्रार्थितमर्थमेषः ।
चिरं करालम्बनदत्तखेदां, कल्पद्रुकोटीमपि किं करोतु ? ॥ ४

वाञ्छातिगार्थप्रदमीशमेन-मासाद्य लोकः पुरुषोत्तमं त्वाम् ।
चिन्तामणौ यच्छति कश्चिदर्थं,
को रज्यते ग्राव्णि विशेषदर्शी ॥ (इन्द्रवज्रा) ५

तृणानि भुक्त्वा किल कामधेनु-र्गवान्तरस्यैव दशां बिभर्तु ।
अस्याः पुरो न्यस्यति कः करौ स्वौ,
त्वदेकनाथे भुवने मनस्वी ॥ ६

कथं निषेव्यो दृषदाहतोऽपि, व्ययं व्रजन् देव ! महत्करीरः ।
त्वां पारिजातं सुकृतैरपूर्वं, सदातनं प्राप्य सचेतनञ्च ॥ ७

अन्विष्यमाणं तु हितानुरूपं, देवेषु रूपं त्वयि पर्यवस्यत् ।
कुतूहलं भानुमतः सभायां, ग्रहस्य किञ्चित् कलयाम्बभूव ॥८

किं कालकूटाशिनि शूलपाणौ, सृजन्ति देवत्वधिया न मूढाः ।
वयं तु सद्बोधसुधां लिहन्तं, त्वामेव देवं विनिभालयामः ॥९

इच्छावशं चेद् भुवनं भवस्य, तिष्ठेत् सदा वा निपतेत् सदा वा।
नेच्छावशं चेद् भुवनं भवस्य, कर्मप्रकृत्यैव तदा सदाशम् ॥१०

(इन्द्रवज्रा)

सर्वत्र कार्ये न कृतिर्निमित्तं, विलक्षणत्वेन यदत्र तत्त्वम् ।
जिनेश ! किञ्चिन्निजवासनायां,
न्यायं नयन्तः कुदृशः पतन्ति ॥ ११

इत्थं च कार्ये न सकर्तृकत्वम्, शक्यं बुधैः कार्यतयाऽनुमातुम् ।
तर्कं विना यत् किल जागरूकः, शरीरजन्यत्वमुपाधिरत्र ॥१२

भवेद्भवे दुर्नयतो हि नित्य-प्रमेव नित्यभ्रम एव भूयान् ।
मानं यतस्तस्य धियो न किञ्चित्,
प्रत्यक्षतायां किल पक्षपाती ॥ १३

कार्यानुरोधेन कुदर्शनानां, कर्तेव नित्यस्तनुरस्तु नित्या ।
जगच्छरीरैर्यदसौ शरीरी, तदीश्वरास्तर्हि वयं भवामः ॥ १४

उत्पत्तिनाशौ न यथा नितान्तं, नेयं सिसृक्षा न च सञ्जिहीर्षा ।
मृषा गुणारोपकृता किलैषा, विडम्बना केवलमीश्वरस्य ॥ १५

देवं परे श्रद्दधते यदीमे, कषायकालुष्यकलङ्कशून्यम् ।
तदा मदाघूर्णितलोचनेयं, गौरी वरीतुं वरमीहतां कम् ॥ १६

देवं परे श्रद्दधते यदीमे, कालीकटाक्षस्पृहणीयशोभम् ।
कुतस्तदा श्रद्दधते न भानुं, समुद्धतध्वान्तविलुप्तदीप्तिम् ॥ १७

तीर्थेश ! वाणी तव सप्तमार्गा, गङ्गां त्रिमार्गामतिशेत एव ।
विहाय तीर्थं परमं तदेना-मन्यां भजन्तो न कथं त्रपन्ते ॥ १८

प्रभो ! परेषां त्वयि मोहभाजां, यो नाम योग्यानुपलम्भदम्भः ।
अर्थे समस्तेऽपि बिभर्तु मौनं स देशकालव्यवधानभाजि ॥१९

अपह्नुवन्ते नितमां भवन्तं, जागर्ति येषां दृगयोग्यतोच्चैः ।
स्वनेत्रपन्थानमनाप्नुवन्त-स्तेषामयोग्याः स्वपितामहाद्याः ॥२०

नखेषु चन्द्रेषु वितेनिरे यै-स्तारासमालिङ्गनकौतुकानि ।
त्वत्पादयोर्देव ! नमोऽस्तु तेभ्यः,
सुरेन्द्रचिन्तामणिचुम्बितेभ्यः ॥ २१

नीलां जिनाधीश ! तवैव देह-च्छायां नु कामं मनुते मनस्वी ।
सम्भाव्यते नाम न रूपमीदृक्, त्रिनेत्रनेत्रानलभस्मनस्तु ॥ २२

कल्पद्रुकोटीगुणलुण्टनस्य, द्वारेव सङ्क्रान्तमिति त्वदीये ।
सौरभ्यमङ्गेऽप्सरसां भ्रमद्भि-र्दृग्भिर्मिलिन्दैः परिचीयते च ॥२३

(इन्द्रवज्रा)

परस्य रोगान् हरतस्त्व(ति त्व)दीये,
रोगाः शरीरे न विशन्ति युक्तम् ।
विषव्यथानाशकरं जनानां, किं कालकूटान्यमृतं स्पृशन्ति ॥२४

न शोणिमानं रुधिरामिषौ ते, न स्वेदखेदौ दधतश्च मेदः ।
इदं विदन्तोऽपि कुपन्थिनो ये,
त्वदक्षमास्तेषु जगाम खेदः ? ॥ २५

कल्पद्रुसौरभ्यसुखं मिलिन्दा, भजन्त्यमी श्वाससमीरणं ते ।
अवाप्य किं नो गुणिनं गुणज्ञाः, प्रमोदमेदस्वलतां व्रजन्ति ॥२६

यशो यतो जन्म लभन्नितान्त-मद्यापि विश्वं विशदीकरोति ।
तस्मिन् शरीरे रुधिरामिषौ ते,
गोक्षीरधाराधवले कथं नो ? ॥ २७

तन्मानसे कस्य न चर्करीति, चिरं चमत्कारभरं बुधस्य ।
आहारनीहारविधिर्विरेजे, दृश्या(शा)-
प्यदृश्या(श्यो)भवतो यदुच्चैः ॥ २८

गुणैरमीभिः किल जन्मतोऽपि, विश्वं विनेतर्ननु योऽतिशेषे ।
नृधर्ममात्रेण कथं कृशाशाः, कुवादिनस्त्वां तमपह्नुवन्ति ॥ २९

पुंसोऽतिशेषे पुरुषोत्तमत्वा-द्देवाधिदेवः सकलाँश्च देवान् ।
अन्यत्र कुत्राप्युपमानमुद्रा, कुवादिविज्ञानसमानशीला ॥ ३०

त्वं शङ्करो भासि महाव्रतित्वाद्-
ब्रह्माऽसि लोकस्य पितामहत्वात् ।
विष्णुर्विनेतः पुरुषोत्तमत्वा-
ज्जिनोऽसि रागादिजयाज्जनार्च्यः ॥ ३१

विधृत्य वाचं भवतः कथाया-मक्षान्तपक्षान्तरसन्निवेशः ।
उदास्यमाने कुपरीक्षकौघे, त्वत्किङ्करः किं करवै विनेतः ॥३२

कलौ कुकाले किल सत्परीक्षा, भिक्षाचराणां सुलभा न भिक्षा।
कथाप्रथायामिति कीर्तिलाभे,
त्वत्किङ्करस्यास्य गतिस्त्वमेव ॥ ३३

भवत्प्रसादाद्भवदिद्धबुद्धिर्लघुर्महानेव तवास्तु दासः ।
ग्रावाऽप्यधिष्ठापकसन्निधाना-
च्चिन्तामणिः किं न जगन्निषेव्यः ॥ ३४

अयं जनो यद्यपि कुन्थुरेव (श्रुताढ्यनाग) प्रभृतीनवेक्ष्य ।
भजे तथापि प्रसभं कथायां, भवत्प्रसादात् परवारणत्वम् ॥३५
(उपेन्द्रवज्रा)

एकान्तमुद्रामधिशय्य शय्यां, नयव्यवस्था किल या प्रमीला ।
तया निमीलन्नयनस्य पुंसः,
स्यात्कार एवाञ्जनिकी शलाका ॥ ३६

एकान्तभेदः किल धर्मधर्मि-
व्यवस्थया विष्णुवदे (वस्तुषु नै) व लभ्यः ।
गोरश्वतेव प्रविभिद्यते चेत्,
गोत्वं लभेत्कस्तदिदं विशेषः ॥ ३७

प्रत्येति जल्पन् समवायमेकं, गवीव गोत्वं न कथं तुरङ्गे ।
आधारतैक्येऽपि समानयुक्ते-स्तया प्रतीकारकृतिर्न युक्ता ॥३८

अभेदभेदात्किल धर्मधर्मिविशिष्टबुद्धिस्तव शासने नु(तु) ।
तदात्मतावृत्त्यनियामकत्वमेकान्तताभाजि ततो न दोषः ॥ ३९

एकत्र वृत्तौ हि विरोधभाजोर्या स्यादवच्छेदकभेदयाञ्चा ।
द्रव्यत्वपर्यायतयोर्विभेदं, विजानतां सा कथमस्तु नस्तु ॥ ४०

भेदः पृथग् भूतिरथान्यभावो, द्विधेति तत्र प्रथमं वदन्ति ।
विभक्तदेशेषु तथान्त्यमन्ये, स्वधर्मधर्मित्वविभागहेतुम् ॥ ४१

अभेदभेदोल्लसदेकवृत्तौ, तेषामवच्छेदकमप्यमृग्यम् ।
स्वाभावयोरेव यदेकवृत्तौ, जागर्त्यवच्छेदकभेदयाञ्चा ॥ ४२

सदेव चेत् स्यादसदेव चेत् स्या-देकीभवेद्वा न जगद्भवेद्वा ।
इमां क्षतिं सोढुमशक्नुवन्त-स्त्वच्छासनं देव ! परे श्रयन्तु ॥४३

परेण रूपेण भजत्यजस्त्रं, स्वरूपतोऽस्तित्वमनस्तिभावम् ।
अनस्तिभावः पुनरस्तिभावं, परोपनीतः स्वचतुष्टयेन ॥ ४४

(उपेन्द्रवज्रा)

विना भवन्तं स्थितिहेतुमन्यं विश्वस्य या धावति देवमाप्तुम् ।
जागर्ति वन्ध्यातनयस्य मौलिमलङ्करिष्णुः कतमा कलेयम् ॥४५

जनुर्भृतां दुर्नयनाशितानां सञ्जीवनी नाम तवैव वाणी ।
उपेत्य मच्चेतसि सा समस्त-रुजां विनाशे पटिमानमेतु ॥४६

त्वयि प्रभो ! जाग्रति दानशौण्डे गोपायति स्वं ननु पारिजातः ।
न केवलं तैः पटलैरलीनां, स्वदारुभावादपि दुर्यशोभिः ॥४७

अन्ये कथं जाग्रति पारिजाते, ह्यपारिजाते न तव व्यथायै ।
निषेव्यतामेष जगन्निषेव्यो, मम प्रभुर्नूनमपारिजातः ॥ ४८

भवद्यशोभिर्भुवि भासितायां, सितेतरन्नाम सिते ममज्जे ।
लुम्पत्परेषामभिधां स्वनाम्ना, सितं न तत्र स्वधिया ममज्जे॥४९

हसन्निमीलद्युगपत्पयोजं भवन्महो भानुयशःशशिभ्याम् ।
शङ्कां वितेने दिनरात्रशिल्प-क्रमे विधेर्नूनमकौशलस्य ॥ ५०

विश्वेऽपि यो मात्यपि नैव वर्णः, सकर्णकर्णादरकोणवासी ।
बोद्धुं क्षमास्तीव्रधियोऽपि धीराः,
श्लोकं त(त्व)दीयं कथमेतमेते ॥ ५१

स्वैरं दिवः स्नातवतस्तटिन्यां, समुच्छलत्तारकतोयबिन्दु ।
सितत्विषस्त्वद्यशसः पवित्रं,
विधुस्तनु प्रोञ्छनकं विभाति ॥ ५२

अयं हि चन्द्रो ननु सैंहिकेयो,
यस्यास्ति रङ्कुः किल कुक्षिगामी ।
उपैत्यमुं म्लानतमं न को वा, विशेषदर्शी यशसस्तवाग्रे ॥ ५३

वियद्विधाता प्रतिघस्त्रघृष्ट-चन्द्रेण भानुद्युतिसिञ्चनैश्च ।
भवद्यशोराशिनिवासयोग्यं, मत्वैव नित्यं कुरुते पवित्रम् ॥५४

भवद्यशोभिः सकलेऽपि सारे, मुष्टे विधुर्नाम बभूव भिक्षुः ।
कपालिनं सम्प्रति सेवमानः, प्राप्नोति लक्ष्मैष कपालमेव ॥५५

भवद्यशःपुष्टिकृते विधिर्यत् सुधाब्धिमिन्दुं निबिडं निपीड्य ।
गृह्णाति सारं तदमुत्र युक्त-मङ्कः समुद्गच्छति पङ्क एव ॥ ५६

आदाय सारं सकलं यदिन्दोरशोभि विश्वं भवतो यशोभिः ।
लक्ष्मच्छलात्तत् स्फुटमीक्षतेऽसौ,
सुधाम्बुधिः शैवलमात्रशेषः ॥ ५७

भवद्यशःपूजनतत्पराया, दिवः प्रसूनाञ्जलिरेव चन्द्रः ।
तयैव साक्षादुपढोक्यमाना, लाजा इवामी विलसन्ति ताराः ॥५८

जिगीषुणा त्वद्यशसा जगन्ति, पत्रं ललम्बे विधुरन्तरिक्षे ।
तदस्य धात्रोपरि वर्षितानि, ताराः प्रसूनानि जयस्य चिह्नम्॥५९

कथं समस्त्वद्यशसा शशाङ्को, यमष्टमी चुम्बति वक्रमेव ।
ततो मुधा साम्यविधित्सुरुच्चैस्तक्ष्णोति धाता तनुमेतदीयाम्॥६०

इयद्वियत्तावककीर्तिगङ्गा नीलाब्जलीलाग्रहयालुमूर्तिः ।
मरालबालस्य तदत्र युक्तं, सुखं सुधांशुः सुषमां बिभर्त्तु ॥६१

भवद्यशोहंसमवेक्ष्य यस्य, स्वरूपमाख्याति विशेषदर्शी ।
वितत्य पक्षौ वियति व्रजिष्णुः,
स मीनभोगी बक एव चन्द्रः ॥ (उपेन्द्रवज्रा) ६२

दग्धस्य चन्द्रो हरनेत्रवह्नौ, मनोभुवो भ्राजति भस्मगोलः ।
विलीयते यं सततं त्वदीय-यशःसुधावारिदवर्षणेन ॥ ६३

राकामयं ते तनुते जगद्यद्यशो विधोर्लाञ्छनपङ्कमार्जि ।
अस्यायमिन्दोर्ननु पक्षपातो, द्विषाऽन्यथा वेति कथं विवेच्यः॥६४

स्वल्पानुरागेव जडं शशाङ्कं, मास्येकवारं भजते नु राका ।
निरन्तरं प्रेम्णि निमज्जतीयं, भवद्यशोभिस्तु सहेन्द्रगेयैः ॥६५

भवद्यशोभिः सह लक्ष्मदम्भात्, स्पर्द्धां दधानः सुपरीक्षकेण ।
करेण चन्द्रः कलिकालक्लृप्ति-
कालेन धात्रा गलहस्तितः किम् ॥ ६६

ब्रह्मा किल ब्रह्ममयं तनोति, यशश्च विश्वं तव देव ! शुभ्रम् ।
मध्ये नु राजा तदिह द्विजानां, ब्रह्माद्वयं वा शितिमाद्वयं वा ॥६७

सुधा सुधांशोः कियती किलेयं, विलीयते या त्रिदशैर्निपीता ।
वर्द्धन्त एवात्र जगज्जनैस्ते, यशांसि पीतान्यपि कर्णपत्रैः ॥६८

सुधाकरस्ते यश एव साक्षाच्चन्द्रे नु तत्त्वभ्रम एव भूयान् ।
सहावतिष्ठेत कुतोऽन्यथा वा, दोषाकरत्वेन सुधाकरत्वम् ॥६९

भवद्यशःक्षीरनिधेः पयांसि, भृत्वा शशिद्रोणमियं किल द्यौः ।
भवद्गुणस्वर्द्रुमकन्दरूपं, तारागणं सिञ्चति शुभ्रभासम् ॥ ७०

यशोभरस्ते प्रविभाति विश्वसमुद्गकेऽसौ घनसारसारः ।
यदेकदेशो विधुरञ्जनत्वं,
दिवस्तमोलुसदृशः प्रयाति ॥ (उपेन्द्रवज्रा) ७१

भवद्यशःस्पर्द्धनजं रजः किं, मिलत्सुधाधाम्नि कलङ्कपङ्कः ।
जडे भवत्येव नु पङ्किलत्वं, व्याप्तौ निदानं सहचारबुद्धिः ॥७२

देवाधिदेवस्य तव स्वरूपं, स्तोतुं न देवा अपि शक्नुवन्ति ।
तथापि कल्याणकरी ममास्तु, भक्त्या भवद्वर्णनवर्णिकेयम् ॥७३

पीयूषपात्रं वितनोति तारा-रेखाभिराभिः शशिनं तु रिक्तम् ।
भवद्गुणानां गणनां विधित्सु-
र्विधिः पुनः किं दिवि पूर्यमाणम् ॥ ७४

भवेद् भवप्रक्षयशुद्धिभाजां, वाग्वर्णनानां तुलना धियां चेत् ।
गाने गुणानां तु तदा कदाचित्,
पदं निदध्युस्तव योगिनोऽमी ॥ ७५

परार्द्धपाथोनिधिपारदृश्वा, विधेर्यदि स्याद् गणितप्रकारः ।
भवद्गुणानां गणना तथापि,
कथापि वा वारिधिलङ्घनस्य ॥ (उपेन्द्रवज्रा) ७६

भवद्गुणानां विधिरभ्रपट्टे, भवत्प्रतापैः परितर्जितस्य ।
द्रवैः सुमेरोस्त्रपया द्रुतस्य, सौवर्णवर्णैर्लिखतु प्रशस्तिम् ॥७७

भवद्गुणानां गणनाय नायं, ताराङ्करेखाः प्रवरः प्रकारः ।
स्मरत्विदानीं द्रुहिणस्त्रिलोक्यां, दोधूयमानां परमाणुराजिम् ॥७८

न्यस्तां कदाचिद् घनमूलकूले, करेशयानां च कदाचिदिन्दुम् ।
भवद्गुणानां गणकस्य धातुः,
खटीं विना नाम घटी न यातु ॥ ७९

धातुस्तव श्लोकपरीक्षणेच्छोश्छन्दोऽपि मन्दोदरतां प्रयाति ।
येनैकवर्णेन जगज्जगाहे,
सीमैव काऽनुष्टुभि तस्य नाम ॥ (इन्द्रवज्रा) ८०

दिक्चक्रचक्रभ्रमणैर्गुणैस्ते, यशःपटं यत् कवयो वयन्ति ।
अस्मिन् विधातुः किल तार्किकस्य,
पपात तर्कः पथि कर्कशेऽस्य ॥ ८१

विद्याकलाकौशलशिल्पिनोऽपि, गुणेऽपि वृद्धिस्तव सुप्रतीता ।
तदत्र वैयाकरणो विधाता, विलक्षणं लक्षणमभ्युपैतु ॥ ८२

तारापदैस्ते सुगुणप्रशस्तेर्यस्याः सिसृक्षा नभसः सितस्य ।
सेयं विधातुः कतमा समीक्षा, भिक्षाचरी भूतवती मनीषा ॥८३
(इन्द्रवज्रा)

स्वनिग्रहानुग्रहतः स्वभक्तं, परे परं धातुमधीशतां ते ।
मामेव मां कर्त्तुमलम्भविष्णुस्त्वमेव देवः कुशलानि कुर्याः ॥८४

धृत्वा नयं निश्चयमभ्युपेयस्त्वं नाम नैवेत्यहमासमुख्यः ।
वर्ते तथापि व्यवहारवर्ती, त्वत्किङ्करत्वस्पृहयालुरेव ॥ ८५
(इन्द्रवज्रा)

विद्याविदो देव ! तवैव सेवां, मुख्यं महानन्दपदं वदन्ति ।
इदं पदस्य क्व चिदन्यदर्थे, निरूढया लक्षणया प्रयोगः ॥ ८६

(स्रग्धरा)

अद्यावद्यापनोदादुदयति मम हृन्नन्दने पारिजातो,
नद्याः सद्यः सुधाया मम तनुरखिला निर्झरैरद्य शस्ता ।
चिन्तारत्नं च मेऽभूत् कलितकरतलक्रोडसङ्क्रीडनश्रीः,
श्रीर्मे त्वद्यै(य्ये)व भर्तर्भवति भवतिरोधानदक्षे प्रदृष्टे ॥ ८७

याचे नाचेतनं यत् किमपि सुरमणिं नापि कल्पद्रुपूगं,
स्वर्धेनुं नापि नापि प्रसृमरकमलाक्रीडितं कामकुम्भम् ।
सेवाहेवाकिदेवाधिपतिशतनतस्तद्भवानेव भर्त-
र्दाता मे पर्यवस्यन् भवतु भवतुदे वाञ्छितार्थे श्रिये च ॥ ८८

सङ्कल्पाः कस्य न स्युर्निजहृदयदरीकोणजाङ्कूरकल्पाः,
सेकच्छेकस्य तत्र प्रभवति नु परं भर्तुरिच्छा रसस्य ।
ते तत्त्वं याच्यमानः किमपि निजमनःसञ्चरिष्णुर्भविष्णु-
र्भ्राजिष्णुर्भावभाजां मम विमलफलं योग्य एवासि दातुम् ॥८९

मोहापोहाय चेत् स्याज्जिनमतसुमता काम्यकर्मप्रलिप्सा,
भर्तर्भक्तिस्तु तत् स्यादभिविभु कृतया याञ्चया नानुबन्धः ।
तेनायं याचमानो किमपि जिन ! भवत्किङ्करो योग्य एव,
प्रायो योग्यत्वभाजस्तव पदकमले भृङ्गभूयं भजन्ते ॥ ९०

भर्ता संसारगर्तापतदखिलजनत्राणदक्षस्त्रिलोक्या,
भर्ता हर्ता जनानां दुरितसुविततेर्जन्मलक्षोर्जितायाः ।
भर्ता तर्ता भवाब्धेर्निजसविधजुषां तारणेऽपि प्रभूष्णु-
र्भर्ता कर्ताऽस्तु शङ्खेश्वरनगरमणिर्भावुकानां ममासौ ॥ ९१

जीयाःस्वर्णाद्रिचूलाद्यतुलतरकचस्यूतजीमूतमाला,
कालिन्दीमध्यवेल्लत्कुवलयवलयश्यामलच्छायकायः ।
कायोत्सर्गावलम्बे शठकमठहठोन्मुक्तमेघोपलोप-
च्छत्रीभूताहिनाथस्फुटमणिकिरणश्रेणिविद्योतिताशः ॥ ९२

जीयाश्चान्द्रीयरोचिर्निचयसितयशः क्षीरपाथोधिमज्जद्-
ब्रह्माण्डोड्डीनबिन्दूभवदमरनदीनीरपूतान्तरिक्षः ।
जृम्भत्कुन्दावदातत्रिदशपतिकराम्भोजसंवीजिताभ्यां,
चारुभ्यां चामराभ्यां त्रिभुवनविभुतां व्यञ्जितां बिभ्रदुच्चैः ॥९३

जीयाः सज्ज्ञानभास्वन्मुकुरपरिसरक्रीडिताऽऽकारभारं,
विश्वं गृह्णन् समग्रं प्रतिसमयभवद्भूरिपर्यायभूमिम् ।
बिन्दूभूताहमिन्द्राद्यखिलसुखमहानन्दसन्दर्भगर्भ-
ज्योतिर्बिभ्रत् प्रकृष्टं जननजनितभीभेदमेदस्विताभूत्(भूः) ॥९४

जीयाः प्रद्योतिदन्तद्युतिततिषु लसज्जानुदध्नप्रसून-
भ्राम्यद्भृङ्गाङ्गनानां भवति सति मुहुः पुष्यतादात्म्यबोधे ।
श्रीमद्धर्मोपदेशे श्वसितपरिमलोद्गारसारेण दार्ढ्यं,
सौरभ्यं पारिजातव्रतिततिगतामुष्णतां दातुमुत्कः ॥ ९५

जीयाः संसारधन्वाध्वनि जनिजनितानन्ततापासहानां,
भव्यानां कल्पवल्लीपरिचितसखितामादिशन् देशनां स्वाम् ।
मोक्षाध्वन्यस्य साधोर्गहनतमतमोध्वंसनिर्बन्धभाजां,
दत्वा सज्ज्ञानदीपं घनरुचिरुचिरं क्लृप्तविश्वोपकारः ॥ ९६

जीयाः पादावनम्रत्रिदशपतिशिरोमौलिवैडूर्यरोचिः,
कस्तूरीपत्रवल्लीनवनवरचनारोचितक्ष्माशरीरः ।

उत्सर्पद्भिः पदाब्जान्नखरुचिपटलैः पाटलैः कुङ्कुमाम्भो-
दम्भोदग्रैर्दशानामपि तनुमनिशं भूषयन् दिग्वधूनाम् ॥ १७

जीयाः पीयूषवीचीनिचयपरिचितिं प्राप्य माधुर्यधुर्यां,
वाचं वाचंयमेभ्यो ननु जननजरात्रासदक्षां ददानः ।
चेतस्युत्पन्नमात्रां निजपदकमलं भेजुषां याचकानां,
याञ्चां सम्पूर्य कल्पद्रुमकुसुमसितैर्व्याप्नुवन् द्यां यशोभिः ॥१८

पू.उपा.श्री यशोविजयविरचितम्

## ३४. ॥ श्रीगोडीपार्श्वस्तवनम् ॥

(शिखरिणी)

..... ..... ..... ..... ..... ॥ ६

स्मरः स्मारं स्मारं भवदवथुमुच्चैर्भवरिपोः
पुरस्ते चेदास्ते तदपि लभते तां बत दशाम् ।
रिपुर्वा मित्रं वा द्वयमपि समं हन्त ! सुकृतो-
ज्झितानां किं ब्रूमो जगति गतिरेषास्ति विदिता ॥ ७

दृशां प्रान्तैः कान्तैर्नहि वितनुषे स्नेहघटनां
प्रसिद्धस्ते हस्ते न खलु कलितोऽनुग्रहविधिः ।
भवान् दाता चिन्तामणिरिव समाराधनकृता-
मिदं मत्वा सत्त्वा दधति तव धर्मे दृढरतिम् ॥ ८

स सेवाहेवाकैः श्रित इह परैर्यः शुभकृते
नियन्ता हन्तायं सजति गृहिणीं गाढमुरसा ।
भवेदस्मात् कस्मात् फलमनुचितारम्भरभसा-
ल्लतावृद्धिर्न स्याद् दवदहनतो जातु जगति ॥ ९

प्रदीपं विद्यानां प्रशमभवनं कर्मलवनं
महामोहद्रोहप्रसरदवदाहे(ने)न विदितम् ।
स्फुटानेकोद्देशं शुचिपदनिवेशं जिन ! तवो-
पदेशं निःक्लेशं जगदधिप ! सेवे शिवकृते ॥ १०

अगण्यैः पुण्यैश्चेत् तव चरणपङ्केरुहरजः
शुचिश्लोका लोकाः शिरसि रसिका देव ! दधते ।
तदा पृष्ठाकृष्टा धृतधृतिरमीषां कृतधिया-
मविश्रान्तं कान्तं त्यजति न निशान्तं जलधिजा ॥ ११

उदारं यस्तारं तव समुदयत्पूषविलस-
न्मयूषे प्रत्यूषे जिनप ! जपति स्तोत्रमनिशम् ।
प्रसर्पद्दानाम्भःसुभगकरटानां करटिनां
घटा तस्य द्वारि स्फुरति सुभटानामपि न किम् ? ॥ १२

महालोभक्षोभव्यसनरसिकं चेतसि यदि
स्फुरेद् वारंवारं कृतभवनिकारं त्वदभिधम् ।
तमोह्रासादासादिततविकासाय मुनये
तदा मायाकाया न खलु निखिला द्रुह्यति निशा ॥ १३

स्थलीषु प्रभ्रष्टान् शिवपथपथः सङ्गभविनो
विना त्वामन्यः कः पथि नयति दीपानुकृतिभिः ।
प्रभावादुद्भूतस्तव शुचिरितः कीर्तिनिकरः
करोत्यच्छं स्वेच्छं कलिमलिनमह्नाय भुवनम् ॥ १४

विलोलैः कल्लोलैर्जवनपवनैर्दुर्दिनशता-
हतोद्योतैः पोतैर्निकटविकटोद्यज्जलचरैः ।

जनानां भीतानां त्वयि परिणता भक्तिरवना (नौ)
जगद्बन्धो ! सिन्धोर्नयति विलयं कष्टमखिलम् ॥ १५

अटव्यामेकाकी नतनिखिलनाकीश ! पतितो
वृतायां कीनाशैरयि ! (रिव)हरिकरिव्याघ्रनिकरैः ।
जनस्तत्पूतात्मा भवन इव भीतिं न लभते
मनश्चेत् त्वन्नामस्मरणकरणोत्कं वितनुते ॥ १६

जपन्तस्त्वन्नाम प्रतिदशमि मन्त्राक्षरमयं
दशानामाशानां श्रियमुपलभन्ते कृतधियः ।
दशाऽप्याचाम्लैस्तु त्रिदशतरवः सन्निदधते
कृतैः किं वा न स्याद् दशनिरयवासार्तिविलयः ॥ १७

स्रजं भक्त्या जन्तुर्घनसुमनसां सौरभमयीं
न यः कण्ठे धत्ते तव भवभयार्तिक्षयकृतः ।
कथं प्रेत्याभ्येत्य त्रिदशतरुपुष्पस्रजमहो
शुभायत्तां धत्तां त्रिदशतरुणी तस्य हृदये ? ॥ १८

पिता त्वं बन्धुस्त्वं त्वमिह नयनं त्वं मम गति-
स्त्वमेवासि त्राता त्वमसि च नियन्ता नतनृपः ।
भजे नान्यं त्वत्तो जगति भगवन् ! दैवतधिया
दयस्वातः प्रीतः प्रतिदिनमनन्तस्तुतिसृजम् ॥ १९

जगज्जैत्रैश्चित्रैस्तव गुणगणैर्यो निजमनः
स्थिरीकृत्याकृत्याद् भृशमुपरतो ध्यायति यतिः ।
इहाप्यस्योदेति प्रशमलसदन्तःकरणिका-
समप्रेमस्थेमप्रसरजयिनी मोक्षकणिका ॥ २०

फणैः पृथ्वीं पृथ्वीं कथमिह फणीन्द्रः सुमृदुभि-
र्हरिन्नागा रागात् कथमतिभरक्लान्ततनवः ।
क्व कूर्मो वा धत्तां निभृततनुरेको जलचरः
पटुर्धर्मः शर्मप्रभव ! तव तां धर्तुमखिलाम् ॥ २१

ज्वलन् ज्वालाजालैर्ज्वलनजनितैर्देव ! भवता
बहिः कृष्टः काष्ठात् कमठहठपूरैः सह दितात् ।
नमस्कारैः स्फारैर्दलितदुरितः सद्गुणफणी
किमद्यापि प्रापि प्रथितयशसा नेन्द्रपदवीम् ॥ २२

महारम्भा दम्भाः शठकमठपञ्चाग्निजनिता-
स्त्वया दीर्णाः शीर्णाखिलदुरितकौतूहलकृता ।
किमाश्चर्यं वर्यं तदिह निहताः किं न रविणा
विनायासं व्यासं रजनिषु गता ध्वान्तनिकराः ॥ २३

ज्वलत्काष्ठक्रोडात् फणिपतिसमाकर्षणभवं
यशः कर्षत्युच्चैस्तव परयशः कारणगुणात् ।
इदं चित्रं काष्ठाद् बहिरपसृताज्जातमहितो
न यत् स्पष्टं काष्ठापसरणरसं हन्त ! वहति ॥ २४

द्विषत्तापव्यापप्रथनपटुभिर्मोहमथनैः
प्रतापैराक्रान्तस्तव न कमठः कान्तिमधृत ।
महोभिः सूरस्य प्रथितरुचिपूरस्य दलित-
द्युतिस्तोमः सोमः श्रयति किमु शोभालवमपि ? ॥ २५

विलासः पद्मानां भवति तमसामप्युपशमः
प्रलीयन्ते दोषा व्रजति भवपङ्कोऽपि विलयम् ।

प्रकाशः प्रोन्मीलेत् तव जिन ! जगज्जित्वरगुण !
प्रतापानां भानोरिव जगदभिव्याप्तिसमये ॥ २६

किमु स्पष्टैः कष्टैः किमु परिणतैरासनशतैः
प्रयोगा योगानां नहि भववियोगाय पटवः ।
त्वदाज्ञा चेदेका शिरसि न विवेकादुपहृता
विना वीर्यं कार्यं न भवति नृणां भेषजगणैः ॥ २७

नराः शीर्षे शेषामिव तव विशेषार्थविदुषः
शतै राज्ञामाज्ञामिह दधति ये देव ! महिताम् ।
अविश्रामैस्तेषामहमहमिकायातनृपति-
प्रणामैरुद्दामैः समुदयति कीर्तिर्दिशि दिशि ॥ २८

जगत्स्वामी चामीकररजतरत्नोपरचितै-
र्विशालैस्त्वं सालैः परमरमणीयद्युतिरसि ।
तव ब्रूते भूतेः समवसरणक्ष्माप्यतिशयं
ध्वजव्याजभ्राजत्सरसरसना दुन्दुभिरवैः ॥ २९

सभायामायाताः सुरनरतिरश्चां तव गणाः
स्फुटाटोपं कोपं न दधति न पीडामपि मिथः ।
न भीतिं नानीतिं त्वदतिशयतः केवलमिमे
सकर्णाः कर्णाभ्यां गिरमिह पिबन्ति प्रतिकलम् ॥ ३०

गिरः पायं पायं तव गलदपायं किमभवन्
सुधापाने जाने नियतमलसा एव विबुधाः ।
तदक्षुद्रा मुद्रा सितमहसि पीयूषनिलये
निजायत्ता दत्ता जठरविलुठल्लक्ष्ममिषतः ॥ ३१

तनीयानप्युच्चैर्न पटुरशनीया परिभवः
पिपासापि क्वापि स्फुरति न भवद्गीःश्रवणतः ।
भवेत् साक्षाद् द्राक्षारसुरसिकता हन्त ! बहुधा
सुधास्वादः सद्यः किमु समुदयेन्नाधिवसुधम् ॥ ३२

ब्रुवाणैर्गीर्वाणैर्जिन ! सितकरं कीर्तिनिकरं
तव प्रत्नै रत्नैर्झटिति घटिता धर्मपरिषत् ।
अमन्दा मन्दारद्रुमकुसुमसौरभ्यसुभगा
न किं चित्ते धत्ते भुवनभविनां मेदुरमुदम् ? ॥ ३३

'अशोक'स्ते श्लोकश्रवणजनितोऽयं जयति किं
शिरो धुन्वन् भूयश्चपलदलदम्भादतिमुदः ।
समस्तोदस्तोद्यद्दुरितपटलस्य प्रतिभुवः
शिवश्रीलाभस्य प्रथितगुणरत्नव्रजभुवः ॥ ३४

जगद्भानोर्जानोः सममसमसौरभ्यकलितं
पुरः के वा देवास्तव न दधते 'पुष्पनिकरम्' ।
प्रसर्पत्कन्दर्पस्मयमथनमुक्ताश्रव ! भवत्-
प्रभावादस्यापि व्रजति नियतं बन्धनमधः ॥ ३५

गलद्रोधं बोधं निजनिजगिरा श्रोतृनिकरा
लभन्ते हन्तेह त्वदुदित'गिरा' नात्तभिदया ।
इमां ते योगर्द्धिं न खलु कुशलाः स्पर्द्धितुमहो !
परे धामक्रामद् गगनमिव सूर्य्यस्य शलभाः ॥ ३६

मुखेन्दुज्योत्स्नेव स्फुटतनुलसत्कान्तियमुना-
प्रशंसा हंसाली किमु किमुत पुण्यर्द्धिरखिला ।

स्मितश्रीः किं लक्ष्म्याः किमुत परमध्यानघटना
प्रभो ! त्वन्मौलिस्था विलसति सिता 'चामरततिः' ॥ ३७

न किं देवाः सेवां विदधति 'मृगेन्द्रासन' जुष-
स्तव प्रौढाम्भोदप्रतिमवपुषः पुण्यजनुषः ।
प्रदेशे स्वर्णाद्रेः क्वचन रुचिरे नन्दनवने
प्रियङ्गोः सङ्गोत्काः किमु न सततं षट्पदगणाः ॥ ३८

अभून्नेन्दुर्भूयःप्रभविभुमुखीभूय न सुखी
तमोग्रासोल्लासस्तदिह ननु मय्येव पतितः ।
इदं मत्वा सत्त्वात् किमु तव रविर्मौलिमधुना
श्रितो नेतश्चेतःसुखजनन 'भामण्डल' मिषात् ॥ ३९

स्फुरत्कैवल्यश्रीपरिणयनदिव्योत्सवमिव
त्रिलोकीलुण्टाकस्मरजयरमाताण्डवमिव ।
सदा धामस्थामप्रसरमिव शंसन्नतितरां
तवाकाशेऽकस्मात् स्फुरति पुरतो 'दुन्दुभिरवः' ॥ ४०

परं चिह्नं विश्वत्रितयजयदिव्यव्यवसिते:
कृतव्यापत्तापत्रयविलयसौभाग्यनिलयः ।
धृतं हस्तैः शस्तैस्त्रिदशपतिभिः प्रेमतरलै-
र्भवन्मौलौ 'छत्रत्रय' मतितरां भाति भगवन् ! ॥ ४१

विलासो नारीणामिह खलु पराभूतिरुदिता
प्रसिद्धा चान्येषां तव च परमोहव्यवसितिः ।
इदं सर्वं साम्यं तदपि तव तैनैव तुलनां
सहर्षं भाषन्ते परमकवयः कौतुकमदः ॥ ४२

अपारव्यापारव्यसनरसनिर्माणविलय-
स्थितिक्रीडाव्रीडा न खलु तव विश्वे विलसति ।
न कोपं नारोपं न मदमदिरोन्मादमनिशं
न मोहं न द्रोहं कलयसि निषेव्योऽसि जगतः ॥ ४३

भवेद् भूतावेशः परतनुनिवेशः कथमहो !
परेषां संक्लेशः स्फुरति हि महामोहवशतः ।
न चेदेवं देवं यदि चपलयेन्नर्मरचना
विलीना दीनासौ तदिह भुवनेऽधीरिमकथा ॥ ४४

त्वदौपम्यं रम्यं यदि हतधियो ! हन्त ! ददते
परेषामुल्लेखात् प्रकृतहितदानस्य जगति ।
न किं ते भाषन्ते विषतरुषु कल्पद्रुतुलनां
प्रलापाः पापानां सपदि मदिरापानजनिताः ॥ ४५

निशाभ्यः प्रत्यूषे विफलबदरीभ्यः सुरतरौ
विषेभ्यः पीयूषे चुलुकसलिलेभ्यो जलनिधौ ।
गिरिभ्यः स्वर्णाद्रौ करिणि हरिणेभ्यः खलु यथा
तथान्येभ्यो नाथ ! त्वयि गुणसमृद्धेरतिशयः ॥ ४६

मुखं ते निस्तन्द्रं जितसकलचन्द्रं विजयते
कृपापात्रे नेत्रे हसितकजपत्रे विलसतः ।
त्वदङ्गो वामाक्षीपरिचयकलङ्कोज्झित इति
प्रभो ! मूर्तिस्फूर्तिस्तव शमरसोल्लासजननी ॥ ४७

तरी संसाराब्धेर्भुवनभविनां निर्वृतिकरी
सदा सद्यः प्रोद्यत्सुकृतशतपीयूषलहरी ।

जरीजृम्भज्जृम्भत्रिदशमणिकान्तिस्मयहरी
वरीवर्ति स्फूर्तिर्गतभव ! भवन्मूर्तिनिलया ॥ ४८

इमां मूर्तिस्फूर्तिं तव जिन ! समुद्वीक्ष्य सुदृशां
सुधाभिः स्वच्छन्दं स्नपितमिव वृन्दं ननु दृशाम् ।
कुदृष्टीनां दृष्टिर्भवति विषदिग्धेव किमतो
विना घूकं प्रीतिर्जगति निखिले किं न तरणेः ? ॥ ४९

इमां मूर्तिस्फूर्तिं तव जिन ! गतापायपटलं
नृणां द्रष्टुं स्पष्टं सततमनिमेषत्वमुचितम् ।
न देवत्वे ज्यायो विषयकलुषं केवलमदोऽ-
निमेषं निःशेषं विफलयतु वा ध्यानशुभदृक् ॥ ५०

भवद् ध्यानस्नानप्रकृतिसुभगं मे सुहृदयं
पवित्रा चित्रा मे तव गरिमनुत्या भवतु गीः ।
प्रणामैः सच्छायस्तव भवतु कायश्च सततं
त्वदेकस्वामित्वं समुदितविवेकं विजयताम् ॥ ५१

अहीनत्वख्यातिं वहसि महसा पीनसुषमां
क्षमां बिभ्रद् भूयः फणमणिघृणिध्वस्ततिमिरः ।
तथाप्येतच्चित्रं क्षणमपि न तृष्णाश्रयणकृत्
न वाधो निर्बाधो वसति मितसिद्धिर्वितनुषे ॥ ५२

गलत्पोषा दोषास्त्वयि गुणगणाः क्लृप्तशरणा
गतक्षोभा शोभा हृदयमपि लोभादुपरतम् ।
त्विषां पात्रं गात्रं वदनमतिलावण्यसदनं
तवाक्षुद्रा मुद्रामृतरसकिरः पर्षदि गिरः ॥ ५३

विना बाणैर्विश्वं जितमिह गुणैरेव भवता
विना रागं चित्तं भुवनभविनां रञ्जितमपि ।
विना मोहं मुग्धः श्रितबुध ! विनाङ्गीकृतशिवो
विरूपाक्षाकारं विगलितविकारं विजयसे ॥ ५४

गुणास्ते स्पर्द्धन्ते प्रसृमरशरच्चन्द्रनिकरान्
कथं व्यक्तं रक्तं भवति हृदयं तैर्भवभृताम् ।
कठोरं चेतस्ते यदपि कुलिशाद् घोरनियमे
कथं विश्वे विश्वेश्वरवर ! कृपाकोमलमदः ॥ ५५

मुनीनां ध्यानाब्धौ तव मुखविधोर्दर्शनरसात्
तरङ्गैरिङ्गद्भिः प्रशमरससंज्ञैः प्रसृमरैः ।
भृशं फेनायन्ते हत मदनसेना गुणगणाः
तवोच्चैः कैलाशद्युतिमदभिदायां सुनिपुणाः ॥ ५६

गुणास्ते ते हंसास्त्रिजगदवतंसायित ! चिरं
भजन्ते ये ध्यानामृतरसभृतं मानसमदः ।
भिदां तन्वन्त्येते बत परयशोमौक्तिकगणैः
कृताहाराः स्फारा न किमु पयसोर्दोषगुणयोः ॥ ५७

(अतः परं विशीर्णानि पद्यानि पञ्च)
विधिः कारं कारं गणयति नु रेखास्तव गुणान्
सुधाबिन्दोरिन्दोर्वियति विततास्तारकमिषाः ।
प्रतिश्यामायामान् व्रजति न विलासोऽस्य निधनं
ततो रिक्ते चन्द्रे पुनरपि निधत्तेऽमृतभरम् ॥ ६३

महो राहोर्नाहो मलिनमलिपङ्क्तिश्च धवला
बलाकामाकारा द्विकवृकपिकानामनुसृताः ।

न शैलाः कैलाशा इव किमभवन्नञ्जनमुखा
भृशं विश्वं विश्वं सितयति भवत्कीर्तिनिकरे ॥ ६४

यशोभिस्तेऽशोभि त्रिजगदतिशुभ्रैर्भृशमित-
स्तिथिः सा का राका तिथिरिह न या हन्त ! भवति ।
कुहूर्नाम्नैवातः पिकवदनमागत्य शरणं
श्रिता साक्षादेषा परवदनवेषा विलसति ॥ ६५

यशोदुग्धाम्भोधौ भवति तव मीनाकृति नभो
ध्रुवं स्फारास्तारा जलकणतुलामीश ! दधते ।
किमावर्तः श्वभ्रं गिरीशगिरिगौरीशशशभृत्-
त्रिपिण्डी डिण्डीरद्युतिमुपगता नास्ति किमिह ॥ ६६

प्रयागेऽस्मिन् विश्वे प्रसरति भवत्कीर्तिरनिशं
रसैस्तुङ्गा गङ्गा गिरिशगिरिशीतांशुविशदा ।
परेषां निःशेषा जिनवर ! कुकीर्तिश्च यमुना
घनाम्भोदश्यामा ननु महसहस्रापतदिह ॥ ६७

(इतः परं त्रुटितमस्ति त्रिनवतिश्लोक पर्यन्तम्)
कथा का ते ख्यातेः कृतविपुलसातेश्वर ! भवत्-
प्रभावादन्येषामपि भवति नो कूटघटना ।
न कः प्राणी वाणीरसहृतजगन्मानसतृषं
श्रयेत त्वां नाथं दलितघनमायामृषमतः ॥ ९४

भवान् चक्री कर्मव्रजविकटवैताढ्यघटितं
कपाटं ग्रन्थ्याख्यं सुपरिणतिदण्डाद् विघटयन् ।
प्रतीर्योद्यद्वीर्यो जयति सकलासद्ग्रहजलं
प्रपूर्णेच्छ ! म्लेच्छव्रजसदृशमिथ्यात्वविजयात् ॥ ९५

मता देवाः सुभ्रूस्तनजघनसेवासु-रसिका
महादम्भारम्भाः प्रकृतिपिशुनास्तेऽपि गुरवः ।
दयाहीनो धर्मः श्रुतिविदितपीनोदय इति
प्रवृद्धं मिथ्यात्वं सुसमयघरट्टैर्दलितवान् ॥ ९६

परं देव ! त्वत्तो न खलु गणयामि क्षणमपि
त्वदादिष्टादिष्टाद् गुरुमपि पथः प्रच्युतमिह ।
सहे नान्यं धर्मं नृपसदसि जल्पव्रजमहे
महेश ! त्वं तस्मान्मयि कुरु दयां शश्वदुदयाम् ॥ ९७

भयं सर्वं याति क्षयमुदयति श्रीः प्रतिदिनं
विलीयन्ते रोगा लसति शुभयोगादपि सुखम् ।
महाविद्यामूलं सततमनुकूलं त्रिभुवना-
भिराम ! त्वन्नाम स्मरणपदवीमृच्छति यदि ॥ ९८

(द्रुतविलम्बित)

नमदमर्त्यकिरीटमणिप्रभापटलपाटलपादनखत्विषे ।
गलितदोषवचोधुतपाप्मने शुभवते भवते भगवन् ! नमः ॥९९

सुरतरुः फलितो मम साम्प्रतं विगलितोऽपि च दुष्कृतसञ्चयः ।
सुरमणी रमणीयभवन्नुतेः करतले रतलेपहरालुठत् ॥ १००

दिशति कार्मणमीश ! शिवश्रियः प्रियसमागमहेतुरनुत्तरः ।
विजयते विहितोत्कटसङ्कटव्युपरमा परमा तव संस्तुतिः ॥१०१

तव मतं यदि लब्धमिदं मया किमपरं भगवन्नवशिष्यते ? ।
सुरमणौ करशालिनि किं धनं
स्थितमुदीतमुदीश ! पराङ्मुखम् ॥ १०२

सर्पत्कन्दर्पसर्पस्मयमथनमहामन्त्रकल्पेऽवकल्पे
प्रत्यक्षे कल्पवृक्षे परमशुभनिधौ सत्तमोहे तमोहे ।
निर्वाणानन्दकन्दे त्वयि भुवनरवौ पावना भावना भा-
ध्वस्तध्वान्ते समग्रा भवतु भवतुदे सङ्गता मे गतामे ॥ १०३
(स्रग्धरा)

प्रसीद सद्यो भगवन् ! अवद्यं हरस्व पुण्यानि पुषाण भर्तः ! ।
स्मर्तव्यतामेति न कश्चिदन्य-
स्त्वमेव मे देव ! निषेवणीयः ॥ (उपजाति) १०४

हरिदन्तिसरीसृपानलप्रधनाम्भोनिधिबन्धरोगजाः ।
न भियः प्रसरन्ति देहिनां
तव नामस्मरणं प्रकुर्वताम् ॥ (ललिता) १०५

चिदानन्दनिस्यन्दवन्दारुशक्रस्फुरन्मौलिमन्दारमालारजोभिः ।
पिशङ्गौ भृशं गौरकीर्तेस्तवाङ्घ्री
गलल्लोभ ! शोभाभिराम ! स्मरामः ॥ (भुजङ्गप्रयात) १०६

बहुधात्र सुधारुचिरैर्वचनैर्भवता भवतापभरः शमितः ।
अमितप्रसरद्गुणरत्ननिधे !
शरणं चरणौ तव तेन भजे ॥ (तोटक) १०७

इति प्रथितविक्रमः क्रमनमन्मरुन्मण्डली-
किरीटमणिदर्पणप्रतिफलन्मुखेन्दुः शुभः ।
जगज्जनसमीहितप्रणयनैककल्पद्रुमो
यशोविजयसम्पदं प्रवितनोतु वामाङ्गजः ॥ (पृथ्वी) १०८

पू.उपा.श्री यशोविजयविरचितम्

# ३५. ॥ वाणारस्यां कृतं श्रीपार्श्वनाथजिनस्तोत्रम् ॥

(स्वागता)

ऐन्द्रमौलिमणिदीधितिमाला-पाटले जिनपदे प्रणिपत्य ।
संस्तवीमि दुरितद्रुमपार्श्वं, भक्तिभासुरमना जिनपार्श्वम् ॥ १

अस्य सम्प्रति जनस्य रसज्ञा, त्वद्गुणौघगणनास्पृहयालुः ।
उद्यतं तुलयति स्थितमुर्व्यां, स्वर्गशाखिकुसुमावचयाय ॥ २

विश्वविश्वविभुतां निभृतं(तां) यः शङ्कते परसुरेषु तवेव ।
तस्य हन्त ! खलता खलतायां, पद्मसौरभमिवानुमिनोति ॥ ३

यः परं परमदेव ! विमूढ-स्त्वत्समानमनुमित्सति तर्कैः ।
भास्करत्वमनुमीय पतङ्गं, सूरमेव न करोति कुतोऽसौ ॥ ४

देवदेव ! वचनं यदवोचः, सप्तभङ्गमपि निर्गतभङ्गम् ।
तन्यते ननु मनः श्रमणाना-मस्तमोहमपि तेन समोहम् ॥ ५

न्यक्कृतः शुभवता भवता य-च्चित्तभूस्त्रिजगतामपकारी ।
तज्जिनोत्तम ! तमोदलन ! त्व-च्छाययैव तनुमेष बिभर्ति ॥६

अप्सरोभिरपि नार्द्रितकं य-द्यच्च न स्मरशिलीमुखभेद्यम् ।
वज्रतुल्यमपि तत्कथमन्त-र्भक्तिभृत्सु तव मार्दवमेति ॥ ७

स्वं विशुद्धमुपयुज्य यदाप्यं, श्राम्यसीह न परं परिणम्य ।
सर्वगोपि नहि गच्छसि सर्वं, तद्विभासि भुवने त्वमिव त्वम् ॥८

रोहिताविहितसख्यमरीचि-त्वन्नखाग्रविधृतप्रतिबिम्बः ।
मज्जति प्रणमतां भवताप-व्यापदामुपशमाय नु कायः ॥ ९

वेद यो विमलबोधमयं त्वां, शुद्धनिश्चयनयेन विपश्चित् ।
स स्वमेव विमलं लभमानो, द्वेष्टि रज्यति न वा भुवि कश्चित्॥१०

ईहते शिवसुखं व्रतखिन्न-स्त्वामनादृतवता मनसा यः ।
विश्वनाथ ! स मरुस्थलसेवा-योग्यतामिह बिभर्त्ति पिपासुः ॥११

आश्रितः कमलया जिननाथ !, त्वं विभासि नरकान्तक एव ।
युज्यतामिति तवामृतधाम-ग्रासलालसतमो विनिघातः ॥ १२

त्वां श्रितं जिन ! विदन्ति दिनोद्य-न्मानवारविमलं सुरसार्थैः ।
उद्भटं सुरुचिभिर्वचनौघै-र्मानवारविमलं सुरसार्थैः ॥ १३

आकलय्य तव वार्षिकदानं, याचकार्थनिजभेदविशङ्की ।
निह्नुते किमिह किन्नरगीतै-स्त्वद्यशोभिरमराद्रिरपि स्वम् ॥१४

वर्षणैर्मुशलधारघनानां, पङ्कलेशमपि या न बभार ।
सा क्षमैव तव कापि नवीना, चञ्चलेऽपि कमठे न चकम्पे ॥१५

अम्बरत्रिपथगाशतपत्रं, लाञ्छनभ्रमरशोभि विभाति ।
तीर्थनाथ ! तव कीर्त्तिमराली-भुक्तशिष्टमिह मण्डलमिन्दोः ॥१६

त्वत्प्रतापदृढदण्डविनुन्नं, बम्भ्रमीति गगने ग्रहचक्रम् ।
कुम्भमत्र जिनराज ! तदुच्चैः, प्रातरेव सृजति द्युतिमन्तम् ॥१७

दुर्जनस्य रसना रसनाम, द्वेषपित्तकटुरेव न वेद ।
नो सुधाशिरसनोचितसारान्, सद्गुणानपि तवाद्रियते या ॥१८

जङ्गमोऽसि जगदीश ! सुरद्रु-र्दानपात्रमिह तद्बहु याचे ।
सर्वगोऽसि परिपूरय सर्वं, हृद्दरीपरिसरस्थितमिष्टम् ॥ १९

यस्तव स्रजमवाप कृपाया-स्तं 'यशोविजय' मेनमवैमि ।
तत्र सत्रमिव मङ्गललक्ष्म्याः, सम्पदे तदधुनापि तवाख्या ॥२०

वासवोऽपि गुरुरप्यपरोऽपि,त्वद्गुणान् गणयितुं कथमीष्टे ।
अस्यते करुणयैव दिगेषा, भ्राजता तदपि भूरिविशेषा ॥ २१

पू.उपा.श्री यशोविजयविरचितम्

## ३६. ॥ श्रीशमीनपार्श्वस्तोत्रम् ॥

(अनुष्टुप्)

.......... ............ ............ ............. ।
.......... ............ ............ ............. ॥ १

कल्पद्रुमोऽद्य फलितो लेभे चिन्तामणिर्मया ।
प्राप्तः कामघटः सद्यो यज्जातं तव दर्शनम् ॥ २

क्षीयते सकलं पापं दर्शनेन जिनेश ! ते ।
तृण्या प्रलीयते किं न ज्वलितेन हविर्भुजा ? ॥ ३

मूर्त्तिः स्फूर्त्तिमती भाति प्रत्यक्षा तव कामधुक्
सम्पूरयन्ती भविनां सर्वं चेतःसमीहितम् ॥ ४

लोचने लोचने ह्येते ये त्वन्मूर्तिविलोकिनी ।
यद् ध्यायति त्वां सततं मानसं मानसं च तत् ॥ ५

सती वाणी च सा वाणी या त्वन्नुतिविधायिनी ।
येन प्रणम्रौ त्वत्पादौ मौलिर्मौलिः स एव हि ॥ ६

मुखस्फूर्तिं तवोद्वीक्ष्य ज्योस्नामिव विसृत्वरीम् ।
मुखानि कैरवाणीव हसन्ति नियतं सताम् ॥ ७

घटी पटीयसी सैव तद् गलद्वृजिनं दिनम् ।
समयोऽसौ रसमयो यत्र त्वद्दर्शनं भवेत् ॥ ८

श्रीशमीनाभिधः पार्श्वः पार्श्वयक्षनिषेवितः ।
इति स्तुतो वितनुतां यशोविजयसम्पदम् ॥ ९

पू.पं. श्री भावविजयप्रणीतम्

## ३७. ॥ श्रीअन्तरिक्षपार्श्वनाथमाहात्म्यम् ॥

(अनुष्टुप्)

प्रणम्य परमानन्दं, शान्तिरसनिमज्जनम् ।
स्वानुभूतश्चमत्कारो, वर्ण्यते सदुपकृते ॥ १

जम्बूद्वीपभरतस्य मध्यभूभागमण्डनम् ।
पुरं सत्यपुरं नाम्नाऽभूद्वनखण्डमण्डितम् ॥ २

तत्रौषवालवंशेऽभू-द्राजमल्लोऽस्य तु प्रिया ।
मूली नाम्ना भानिरामं, पुत्र सौम्यमजीजनत् ॥ ३

अन्यदा तत्र नगरे, शमादिगुणसागरः ।
विजयदेव आचार्यो, ययौ साधुसमन्वितः ॥ ४

घनागमं मयूरीव, तत्र सूरिसमागमम् ।
श्रुत्वा मुदो ययुः सर्वे, वन्दितुं श्राद्धश्राविकाः ॥ ५

वन्द्यसूरिपदाम्भोजं, चातकेष्विव पक्षिषु ।
आगमामृतपिपाषुषूपविष्टेषु तेषु च ॥ ६

सप्तनयाञ्चतुर्भङ्गां दुरितदूरिकारणाम् ।
सुधामुधाकरीं सूरिर्विदधे धर्म्मदेशनाम् ॥ (यु.) ७

तद्‌गिरा प्रतिबुद्धोऽहं, दीक्षां जग्राह सोत्सुकः ।
भावविजय इति मे, दीक्षानाम व्यधाद् गुरुः ॥ ८

ततश्च गुरुभिः सार्द्धं, विहरन्मरुमण्डले ।
अभ्यासयामासाभ्यासं, सूत्रादीनां यथारुचि ॥ ९

ततः सन्तुष्टगुरुभिर्जोधपुराख्यपत्तने ।
श्रीसङ्घसमक्षं मयि, गणिपदं समर्पितम् ॥ १०

ततश्च श्रीमदाचार्यः, पाटणसङ्घप्रेरितः ।
अर्बूदाद्रिमभिवन्द्य सशिष्यो गुर्जरं ययौ ॥ ११

गच्छन्मार्गमृतौ ग्रीष्मे, नेत्रयोर्मे रुजाऽभवत् ।
यथा तथा गुरुभिश्च सार्द्धं पूःपाटणं ययौ ॥ १२

श्रीमन्तः श्रावकास्तत्र, सौषधैरगदङ्करैः ।
विविधोपायनं चक्रुस्तथाऽप्यगातां मे दृशौ ॥ १३

दीपहीनगृहमिव नेत्रहीनोऽहमन्यदा ।
विजयदेवमाचार्यं पृष्टवाँस्तदुपायनम् ॥ १४

ततो मयि कृपां कृत्वा ददौ सूरीश्वरस्तदा ।
पद्मावत्या महामन्त्रं पूर्णविधिविधानतः ॥ १५

ततश्च श्रीमदाचार्यश्चातुर्मासीं समाप्य च ।
मुनिना सह मां तत्र, मुक्त्वाऽन्यत्र विनिर्ययौ ॥ १६

ततो गुरूक्तविधिना, तन्मन्त्राराधिते सुरी ।
एत्य स्वप्ने सविस्तारं, ममाचख्यौ च तद्यथा ॥ १७

कूर्माङ्कहरिवंशस्य, श्रीसुव्रतस्य शासने ।
बभूव रावणो नाम, प्रतिविष्णुर्महाबली ॥ १८

एकदा स्वस्वसृनाथं खरदूषणभूपतिम् ।
प्रेषयामास कस्मैचित्, कार्याय सोऽतिसत्त्वरम् ॥ १९

सोऽपि पाताललङ्केशो, विमानमधिरुह्य च ।
खगः खग इव व्योममार्गेण प्रचचाल च ॥ २०

अनेकान्नगरान् देशान्, वनखण्डाँश्च भूधरान् ।
समुल्लङ्घ्याथ विङ्गोलिं, देशमापाऽशनक्षणे ॥ २१

तदा चोत्तीर्य सो भूमौ, स्नात्वा पूजनपात्रभृत् ।
समानय जिनचैत्यं, सूपकारमदोऽवदत् ॥ २२

प्रणम्य सभयः प्राह, सूपकारः कृताञ्जलिः ।
स्वामिन्पाताललङ्कायां गृहचैत्यं तु विस्मृतम् ॥ २३

इति श्रुत्वा महीनाथस्तत्रस्थं वालुगोमयम् ।
समादाय विनिर्माय, पार्श्वनाथस्य प्रतिमाम् ॥ २४

नमस्कारैर्महामन्त्रैः प्रतिष्ठाप्य समर्च्य च ।
विससर्ज जलकूपे, बिम्बमाशातनाभयात् ॥ २५

पतन्मात्रप्रतिमां तां, तत्र कूपस्थदेवता ।
गृह्य(धृत्वा) पुण्यपूञ्जमिव, चकार वज्रसन्निभाम् ॥ २६

खरदूषणभूपोऽपि, भोज्यं भोज्य ततोऽगमत् ।
स्वामिकार्यं विधायाशु, पुनर्लङ्कापुरीं ययौ ॥ २७

तत्प्रभृति बहुकालं, तत्र कूपे स निर्ज़रः ।
पूजयामास तद्बिम्बं, भक्त्या भाविजिनोत्तमम् ॥ २८

शास्त्रोक्ताऽऽर्यसाद्र्धपञ्च-विंशदेशान्तर्वर्तिकः ।
वैराटनगरेणासौ, मत्स्यदेशोऽवलक्ष्यते ॥ २९

स देशो विङ्गोलनाम्ना, तदा ख्यातस्ततश्च सः ।
वैराटश्च ततोप्यभूत्, वराडेति तु साम्प्रतम् ॥ ३०

तत्राभूच्चन्द्रवंशी राडेलचपुरपत्तने ।
श्रीपालः स च प्रजानां, नेत्रकैरवचन्द्रमाः ॥ ३१

पितृभ्यां कल्पितो नाम, श्रीपालस्तस्य तारुण्ये ।
इलचेति कृतं लोकैः सम्यगिलां प्रशासनात् ॥ ३२

एकदा प्राक्तनैः पापैः, कुष्टरोगं भयङ्करम् ।
प्रादुरभूत्तनौ राज्ञ-स्तेनामूर्च्छत्सोऽभीक्षणम् (क्ष्णम्) ॥ ३३

विविधौषधविद्वैद्यैः कृतोपायोऽपि भूपतिः ।
नालेभे जातुचिच्छान्ति वनवाटिजलाशये ॥ ३४

अन्येद्युरेलचो भूप-स्तया वेदनयाऽऽकुलः ।
निरगात्स्वपुराद्बाह्यं, रुजां निर्वृतिहेतवे ॥ ३५

इतस्ततो भ्रमन् राजा, तोयतृषासमाकुलः ।
यत्र पार्श्वगर्भकूपं, ययौ चिञ्चातरोस्तले ॥ ३६

तत्र कूपे कराङ्घ्र्यास्यं, प्रक्षाल्येलापतिस्तदा ।
स्वच्छस्वादूपयः पीत्वा, पुनः स्वशिबिरं ययौ ॥ ३७

घर्ममार्गमतिक्रान्ते, श्रान्तचित्तः स भूपतिः ।
सायंकालेऽपि सुश्वा (ष्वा)प, सराज्ञिस्तत्र मञ्चके ॥ ३८

यः सदा समग्ररात्रं, मीनेव फर्फरायकः ।
स तस्यां निशि निश्चिन्तो, लेभे निद्रां यथारुचि ॥ ३९

प्रातः समुत्थिते राज्ञि, निरुक्पाणिपदाननम् ।
राज्ञो विलोक्य सा राज्ञी, पप्रच्छ प्राणवल्लभम् ॥ ४०

स्वामिन् ! ह्योऽह्नि कराङ्घ्र्यास्यं, भवद्भिः कुत्र क्षालितम् ।
येनैतद्विनष्टकुष्टं, प्रदृश्यते ममाधुना ॥ ४१

चलतेश ! पुनर्यूयं, सर्वाङ्गं तत्रं क्षाल्यताम् ।
गमिष्यति भवतां वै, तेन तोयेन कुष्टरूक् ॥ ४२

इति राज्या वचोबुद्धो, गत्वा तत्र नृपेलचः ।
सर्वाङ्गं स्नपयामास, पार्श्वपूतेन पायसा ॥ ४३

अनलेन यथा स्वर्णं, तत्तोयेन तथा वपुः ।
बभूव तत्क्षणं तस्य, हीलचस्य निरामयम् ॥ ४४

ततः स सम्प्राप्ताश्चर्य-सराज्ञीलचभूपतिः ।
अन्नपानं परित्यज्या-राधयामास तं सुरम् ॥ ४५

भो कूपान्तरधिष्ठात-र्भो भोऽत्र क्षेत्रदेवते ! ।
यः कोऽपि तिष्ठति सो मे, देहि दर्शं सकृपया ॥ ४६

इत्युदीर्य स्थिते राज्ञि, निर्जगाम दिनत्रयम् ।
दृष्ट्वा दृढप्रणयं तं, तदा तत्रस्थदेवता ॥ ४७

स्वप्नान्तरे समागत्य, बभाणेत्येलचाधिपम् ।
राजन् ! पार्श्वप्रभोर्बिम्बं, विद्यतेऽत्र खराऽर्पितम् ॥ ४८

तन्मूर्तिस्पर्शत एत-न्महापूतं पयोऽभवत् ।
तद्वारिभिः स्नपनेन, त्वच्छरीरं निरामयम् ॥ ४९

तद्बिम्बस्पर्शतोयेना-साध्यान्यपि लयन्ति हि ।
श्वासखासज्वरशूल-कुष्ठादीनि न संशयः ॥ ५०

नेत्रहीनो लभेन्नेत्रे, बधिरः कर्णगोचरम् ।
मूको वाचा पदौ पङ्गु-रपस्मारी पुनर्वपुः ॥ ५१

वीर्यहीनो महावीर्यं, धनार्थी द्रविणं तथा ।
कान्तार्थी कान्तकान्तां च, पुत्रार्थी पुत्रपौत्रकान् ॥ ५२

गतराज्यो महाराष्ट्रं, पदहीनो पदोत्तमः (मम्) ।
जयकाङ्क्षी लभेज्जीतं, विद्याहीनः सरस्वतीम् ॥ ५३

प्लायन्ते भूतवेतालाः, डायिनी शायिनीमुखाः ।
शाम्यन्ति कुग्रहाः सर्वे, मूर्तिस्पर्शेन(स्पृष्टेन)वारिणा ॥(कु.)५४

वर्णैः किं बहुभिरस्याः, स्वेष्टकार्यं प्रदायिनी ।
चिन्तामणिरिव साक्षा-दियं मूर्तिः कलौ नृप ! ॥ ५५

नागराजधरणस्य, सेवकोऽहं स्वयं प्रभोः ।
तदादिष्ट इह स्थित्वा, भक्त्या मूर्तिमुपास्महे (?) ॥ ५६

आकर्ण्येति विभोर्वर्णं भक्त्योल्लसितमानसः ।
तत्प्रत्यक्षचमत्कारीं, मूर्तिं स प्रार्थितः (प्रार्थितवान्) सुरात् ॥५७

देवः प्राह शृणु राजन् ! मार्गिते धनधान्यके ।
दास्येऽहं त्वां यथेष्टं च, परं मूर्तिं कदापि न ॥ ५८

एवं नानाविधै र्वाक्यैः, सुरे(ण) सम्बोधिते(तो)ऽपि सः ।
न व्यधात्पारणं राजा, मूर्तिजिघृक्षुमानसः ॥ ५९

गते प्राणेऽपि यास्यामि, नाहमिति दृढाशयः ।
भक्तपानं विना तत्र, व्यति(य)यौ सप्तवासरम् ॥ ६०

ततस्तपोबलादेत्य, रात्रौ धरणराट् स्वयम् ।
प्रबोध्य तमित्युवाच, राजन् ! किं त्वं हठायसे ॥ ६१

महाचमत्कारिण्यास्या, मूर्त्याः पूजा न सेत्स्यति ।
युष्मद्भिश्च ततो राजन् !, सिद्धकार्यो गृहं व्रज ॥ ६२

राजोवाच फणिराज ! स्वकुक्षिभरणेन किम् ? ।
ततो जगदुपकृते, देहि मूर्तिं मम प्रभोः ॥ ६३

विनाऽऽकृतिं न यास्यामि, गते प्राणेऽपि नागराट् ! ।
ददातु न ददातु वा, मम प्राणस्तु तत्प्रभोः (?) ॥ ६४

इत्याकर्ण्य नागराजः, साधर्मिकष्टभीतिना ।
प्राह तमेलचाधीशं, धरणेन्द्रो धरणीधवम् ॥ ६५

राजन् ! त्वद्भक्तिसन्तुष्टो, दास्येऽहं प्राणतः प्रियाम् ।
जगदुपकृते नूनं, मूर्तिमिमां चमत्कृत(ता)म् ॥ ६६

परमस्य प्रभोः राजन् !, मा कार्षीस्त्वमाशातनाः ।
अन्यथा चेन्महाकष्टं, मच्चेतसि भविष्यति ॥ ६७

ओमिति स्वीकृते राज्ञि, प्राह नागो नृप ! श्रुणु ।
प्रगे स्नात्वा स्वच्छीभूय, त्वमेहि कूपनैकटम् ॥ ६८

विधाय नालशिबिकां, बद्ध्वा तां सूत्रतन्तुभिः ।
तस्मिन् कूपे घटमिवो-त्तार्य करावलम्बनात् ॥ ६९

स्थापयिष्यामि तन्मूर्तिं, यानपात्रे ततो नृप ! ।
बहिर्निष्काष्य वर्धाप्य, नाडिरथे निवेश्यताम् ॥ (यु.) ७०

सप्ताहोगोजनुवत्सौ, रथे नियोज्य तदग्रतः ।
त्वया गम्यं च त्वत्पृष्ठे, सो रथः स्वयमेष्यति ॥ ७१

नीयतां ते यत्र वाञ्छा, बिम्बं पार्श्वप्रभोरिदम् ।
दृ(द्र)ष्टव्यं न त्वया पृष्ठे, दृष्टे पृष्ठे न चैष्यति ॥ ७२

एतत्पञ्चमकालत्वा-ददृष्टो मूर्त्यधिष्ठितः ।
तस्याहं पूरयिष्याम्यु-पासकस्य मनोरथम् ॥ ७३

इत्युक्त्वा तन्निशाशेषे, नागराजे गते सति ।
सम्प्रबुद्धः प्रगे राजा, तथाचक्रे स तत्क्षणात् ॥ ७४

बाह्यागतां प्रतिमां तां, स्थाप्य नालरथे नृपः ।
तर्णकौ द्वौ च संयोज्य, तदग्रिमश्चचाल सः ॥ ७५

मार्गं गच्छन् कियद् दूरं, राजा दध्यौ स्वचेतसि ।
नाकर्ण्यते रथनादं, तत्किं नाथो नागच्छति ? ॥ ७६

इतिचिन्त्य (?) वक्रदृष्ट्या, सेक्षाञ्चक्रे नृपः प्रभुम् ।
तद्दृष्टिपातमात्रेण, निरगादधस्ताद्रथः ॥ ७७

तत्र न्यग्रोधवृक्षाधोऽन्तरिक्षे च स्थितं विभुम् ।
वीक्ष्य सप्तकरोदग्र-मन्तरिक्षस्ततो जगुः ॥ ७८

वर्त्मनि संस्थिते नाथे, सविषादैर्नृपैस्तदा ।
पुनराराधितो नागः, प्राहात्रैव स्थास्यत्यसौ ॥ ७९

इत्याकर्ण्य महीनाथ-स्तत्र चैत्यमकारयत् ।
विशालं लक्षमुद्राङ्कं, रङ्गमण्डपमण्डितम् ॥ ८०

परिसमाप्तं तच्चैत्यं, दृष्ट्वा दध्यौ नृपो हृदि ।
अहो हीदृशचैत्येन, स्थास्यत्यति ममाभिधा ॥ ८१

तच्चैत्ये स्थातुमर्हन्तं, प्रार्थयामास पार्थिवः ।
परं नागच्छति तत्र, नृपेऽभिमानकारणात् ॥ ८२

ततः खिन्नोऽवनीनाथः, पुनः सस्मार भोगिनम् ।
परं नायाति भोगी स, नृपेऽभिमानकारणात् ॥ ८३

अतिखिन्नस्तदा दीनो, राजा पप्रच्छ मन्त्रिणम् ।
प्रभुर्नागच्छति चैत्ये, किं कार्यं तदुपायनम् ॥ ८४

इतिश्रुत्वा हृदि चिन्त्य (?), जजल्प सचिवस्तदा ।
उपायमेकमस्त्यत्र, शृणुत मद्वचः प्रभो ! ॥ ८५

श्रूयतेऽभयदेवाख्यः, सर्वशास्त्रविशारदः ।
मान्यो बहुषु भूपेषु, सूरिः सुरीबलान्वितः ॥ ८६

गुर्जरदेशि(शी)यो राजा, कर्णः कर्णेवविक्रमः ।
स ददौ श्रीमति सूरौ, मल्लधारिमहापदम् ॥ ८७

स चाचार्यो गते वर्षे, स्तम्भनसङ्घसत्तमैः ।
समं माणिक्यदेवेशं, नन्तुमितः समागतः ॥ ८८

स त्वद्य विद्यते देव !, देवगिर्यभिधे पुरे ।
येन केनाप्युपायेन, चेदायातीह साधुभृत् ॥ ८९

तदा तत्सूरिभिर्नूनं, युष्मत्कार्यं च सेत्स्यति ।
इति श्रुत्वा नृपस्तत्र, सचिवेनाऽऽनीतो गुरुम् (रुः) ॥ ९०

अन्तरिक्षे स्थितं बिम्बं, दृष्ट्वा सूरिः सविस्मयः ।
श्रुत्वा नृपवचो नागं, सस्मार त्र्युपवासकैः ॥ ९१

आगत्य धरणस्तत्रो-वाच सूरीश्वरमिति ।
एतच्चैत्यं विनिर्माय, राज्ञो हृदि मदोद्धुतम् ॥ ९२

ततोऽत्र नृपचैत्ये न, स्थास्यति सङ्घमण्डिते ।
इति नागवचः श्रुत्वा, श्राद्धसङ्घमाकारयत् ॥ ९३

भो सर्वश्रावका ! यूयं, श्रृणुतात्राशुलाघवम् ।
कुरुध्वं नूतनं चैत्यं, तत्र स्थास्यत्यसौ प्रभुः ॥ ९४

इति सूरिवचः श्रुत्वा, श्रद्धाभक्तिसमन्वितैः ।
सूरिसङ्गातैः श्राद्धै-र्मिलित्वा चैत्यमकारयत् ॥ ९५

ततः सूरिस्तुतः स्वामी, सुरसङ्क्रमितः स्वयम् ।
खादुत्तीर्य च तच्चैत्ये विवेश सर्वजनेक्षितः ॥ ९६

तत्रापि भूमितः सप्ता-ङ्गुलोच्चं संस्थितं प्रभुम् ।
प्रतिष्ठाविधिना सूरिः, प्रतिष्ठापितवाँस्तदा ॥ ९७

द्विचत्वारिंशदुत्तरै-कादश शत ११४२ विक्रमे ।
माघसितपञ्चम्यर्के, मुहूर्ते विजयागते ॥ ९८

तत्र प्रभोरग्रवामे, भागे तदधिष्ठायक(का)म् ।
स्थापितः तीर्थरक्षार्थं, सूरिः शासनदेवत(ता)म् ॥ ९९

तदा च तत्प्रभोर्भूपो, नानारत्नैः सुमण्डितम् ।
न्यस्य मौलौ किरीटं च कुण्डले कर्णयोर्द्वयोः ॥ १००

हीरविशेषकं भाले, दृष्टिममृतवर्षिणीम् ।
कण्ठे मुक्ताफलहार-मङ्गे स्वर्णाङ्गरक्षिकाम् ॥ १०१

भामण्डलं शिरःपृष्ठे, सूर्यबिम्बविडम्बकम् ।
शीर्षोपरि सितच्छत्रं, मेघाऽऽडम्बरडम्बरम् ॥ १०२

सङ्घविस्त्रग्धरस्तत्र, गुरुचूर्णशिरोमणिः ।
अज्ञानतिमिरं हर्तुं, सोत्ततार निराजनीम् ॥ (च.कु) १०३

ददौ च जिनपूजायै, वासयित्वा पुरं तदा ।
श्रीमद्वासात् श्रीपुराख्यं, श्रीपुरमेकमेलचः ॥ १०४

यत्र विनिर्गतो नाथ-स्तत्रैवेलचभूपतिः ।
कुण्डं बबन्ध कूपस्य, तत्तोयसर्वोपकृते ॥ १०५

तदा तत्र चतुर्मासं, कृत्वा सूरिर्नृपेरितः ।
ततः प्रबोधयन् भव्यान्, विजहार महीतले ॥ १०६

ततो भो भावविजय !, त्वमपि तत्प्रभुं श्रय ।
आगमिष्यति ते नूनं, नयनयुगलं पुनः ॥ १०७

इति रात्रौ सुरीवाचां, श्रुत्वाहं गुरुबान्धवम् ।
श्राद्धाँश्च प्राह तैः सार्द्ध-मन्तरिक्षं ययौ तदा ॥ १०८

तत्र सङ्घे समस्तानां, यात्रिणां प्रभुदर्शनम् ।
अभूत्परं च मे नैव, मन्दभाग्यशिरोमणेः ॥ १०९

तदा खिन्नोऽन्नपानीयं, त्यक्त्वाऽहं दर्शनोत्सुकः ।
नानास्तुत्याऽन्तरिक्षं तं, स्तोतुं तत्र प्रचक्रमे ॥ ११०

नमस्तुभ्यं जिनेन्द्राय, त्राहिणेऽपकृतामपि ।
कलौ जाग्र(गृ)तदेवाय, यथेष्ठफलदायिने ॥ १११

विना स्वार्थमहिर्नाथ !, कृतो नागेश्वरस्त्वया ।
कमठे वैरिणि दत्तं, सम्यक्त्वमतिनिष्ठुरे ॥ ११२

आषाढभूतिकं श्राद्धं, त्वां चिरकालसेविनम् ।
दत्तः स्वामिन् ! त्वया मोक्षः कारुण्यरससागर ! ॥ ११३

भक्त्याऽऽलिङ्गनकुर्वन्तं, गजं स्वर्गो ददे त्वया ।
ततः कलिकुण्डनाम्ना, त्वं प्रथितोऽभवो भुवि ॥ ११४

नवाङ्गवृत्तिकर्तुश्चा-भयदेवगणेशितुः ।
कुष्टं हृत्वा त्वया नाथ !, कृतं हेमद्युतिवपुः ॥ ११५

पालनपुरनराधीशः, पालणः परमारकः ।
भ्रष्टराज्यं पुनर्लेभे, त्वत्पदाम्बुजसेवनात् ॥ ११६

उद्देशिश्रेष्ठिनो गेहे, घृतवृद्धिस्त्वया कृता ।
ततो घृतकलोलाख्यो, नाथ ! त्वं भुवि विश्रुतः ॥ ११७

पुत्राथव फलन्तस्य (?), वृद्धिस्तत्र त्वया कृता ।
ततः फलवृद्धिर्नाम्ना, ख्यातः क्षोणीतलेऽभवः ॥ ११८

एलचपुर्नरेन्द्रस्य, सदाहकीटकुष्टिनः ।
कुष्टं हृत्य त्वया नाथ !, कुद्देहं (?) स्वर्णसन्निभम् ॥ ११९

अत्राप्यन्तरिक्षे स्थातु-मिच्छाऽभूत्ते कलौ परम् ।
मल्लधारिस्तवतुष्ट, एत्य चैत्ये स्थितोऽसि भोः ॥ १२०

एवं कियद्वर्णयामि, भोऽनन्तवर्णगर्भित ! ।
यदि सहस्रजिह्वोऽपि, पारं न तर्त्यहं कथम् ? ॥ १२१

ईदृगीदृक् चमत्कारः, दर्शितो भुवि नाथ ! मे ।
तर्हि किं ? नेत्रयुग्मं ते, कठिनमत्स्युद्घाटितुम् ॥ १२२

हा नाथ ! तात ! हा स्वामिन्, हा वामाकुलनन्दन ! ।
हाऽश्वसेनवंशदीप !, देहि प्रत्यक्षदर्शनम् ॥ १२३

इष्टवस्तु यदि पुत्रं, पितरौ न ददतस्तदा ।
कोऽन्यो दास्यति हे तात !, हा ! हा ! नेत्रं देहि माम् ॥ १२४

इत्युद्गारं कुर्वतो मे, त्रोटयामास दृक्पटम् ।
जनजयारवैः साद्र्ध-मद्राक्षं त्रिजगत्पतिम् ॥ १२५

यथा घनेऽपगतेऽर्कं, पश्यन्ति प्राणिनोऽखिलाः ।
तथाऽहं चक्षुःविषया-नद्राक्षं पदार्थान् पुनः ॥ १२६

हा नाथ ! सत्योऽसि पार्श्वो, लोहं हेमकरो भुवि ।
पार्श्वनाथस्ततः सत्यं, तात ते तात (तात तात !) कृतोऽभिधम्॥
ततश्च पारणं कृत्वाऽहं हर्षोत्फुल्ललोचनः ।
पुनः पुनरन्तरिक्षं, ददर्श दृष्टिदायकम् ॥ १२८

ततो रात्रौ सुषुप्ते मां, एत्याचख्यौ च देवता ।
वत्स ! त्वयाऽत्र कार्यं च, लघुत्वाद् दीर्घमन्दिरम् ॥ १२९

प्रतिबुद्धः प्रभातेऽहं, श्राद्धान् तत्रोपदिश्य च ।
एकत्रार्थं कारयित्वा-ऽऽरम्भयामास मन्दिरम् ॥ १३०

अन्यसङ्घं विसर्ज्याहं, तत्र स्थित्वाऽल्पश्रावकैः ।
यावत् वत्सरकालेन, सस्माप नवमन्दिरम् ॥ १३१

ततः श्रीमद्विक्रमाब्दे १७१५, चैत्रसितषष्ठ्यां रवौ ।
तन्नवमन्दिरे नाथं, स्थापयामास सोत्सवम् ॥ १३२

तत्रापि सोऽन्तरिक्षोऽर्ह-न्न पस्पर्श भुवं तदा ।
स्तुत्यैकाङ्गुलमुच्चं च, निवेशितः कथञ्चन ॥ १३३

तत्र नाथं प्रतिष्ठाप्य, पूर्वाभिमुखमासने ।
बोधिबीजं समुत्पाद्य, कृतकृत्यस्तदाऽभवम् ॥ १३४

तत्रैव मद्गुरोः पादान्, भक्त्या श्राद्धैर्निवेश्य च ।
सूरेर्विजयदेवस्य, गुरुभक्तिपरायणैः ॥ १३५

ततोऽपि कतिपयानि, स्थित्वा तत्र दिनानि च ।
भव्यैर्भावैः परिभाव्य, देवदेवं फणिध्वजम् ॥ १३६

पुनरागमनोत्सौक्य-स्ततो निर्गत्येतस्ततः ।
सर्वत्र सु(सू)चयामासाऽन्तरिक्षज्ञनोपकृते ॥ १३७

एवमन्योऽपि यो मर्त्य-श्चान्तरिक्षं श्रयिष्यति ।
पु(पू)रयिष्यति स तस्य, प्रभुः पूर्णमनोरथम् ॥ १३८

सप्ततीर्थताम्रपत्रं, हीरसूरिरकब्बरात् ।
लेखयित्वा जयं चक्रे यावच्चन्द्रदिवाकरम् (रौ) ॥ १३९

तच्छिष्यो विजयसेनो, जाङ्गिरं प्रतिबोध्य च ।
प्रतिपदि रवौ जीवे, जीवदयामपालयत् ॥ १४०

तच्छिष्यो विजयदेवो, भव्याम्भोजदिवाकरः ।
यवनादौ बहुज्ञातौ दयाधर्मं प्रवर्तितम् ॥ १४१

तस्याभूद् वृद्धशिष्य, आचार्यो विजयप्रभः ।
सूरिगुणैरलश्चक्रे, पादपीठं तदीयकम् ॥ १४२

लघुस्तु भावविजयो, गणिपदसमन्वितः ।
सोऽहमेतद्ग्रन्थकर्ता राज्ये श्रीविजयप्रभे ॥ १४३

विक्रमाब्दे १७१५ रचितवान्, भव्योपकारकाम्यया ।
चरित्रं स्वकीयमेत-दन्तरिक्षकृपात्मकम् ॥ १४४

पू.मु.श्री कीर्तिमेरुविजयविरचितम्
केवलाक्षरमयम्

## ३८. ॥ श्रीसहस्त्रफणापार्श्वनाथस्तवनम् ॥

(गुणमणिनिकर)

सकलकमलकलकलकरचरण !,
शमरसरसचयवरवदचरण ! ।
प्रणमतशतमख ! भवभयहरण !,
मदनमदन ! मदहर ! जनशरण ! ॥ १

अपगतदशभवभयभरजनक !,
वदनकमलगतवरमदजनक ! ।
प्रवचनगणधर, गणधरशमन !,
परपद ! मदगदवरवनदहन ॥ २

जलधरजलचयसमकलवरभ !,
सबलकरणगणहयदमवरभ ! ।

सरभसनरनतवरपदयमल !,
परमतमतगजपदमसबल ! ॥ ३

अमर–खचर–नरनत ! शमसदन !,
समवसरणगतहतरणमदन ! ।
चरणकरणगणशतगणवदन !,
अमलकतमजगजनवशवनन ! ॥ ४

अबलशरणतर ! रतरवमथक !,
अपरपरमपरवरपथकथक ! ।
गतमलगगनगशशधरसकल !,
नतनमतमतमलहरभवशकल ! ॥ ५

अदरकमलदलवरपदकमल !,
सदमदननजनव्रतततभसल ! ।
नरपकमलनयनकमलगण !,
दशशतकरकमरणशरणतमलयपथरथक ! ॥ ६

अघवनघनचयसरभसगमन !,
शठघठकमठकवरटकशमन ! ।
कमनकदलदलवरगरगरल !,
वचनरचनरसगमवरवरल ! ॥ ७

दशशतफणधरवरफणसफल !,
कप.....दलघटघटनकमफल ! ।
मम भव शरणकमरमलजलद ! ?
... ...परभव सरसक वरद ! ॥ ८

## ३९. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(केवलाक्षरमयम्)

जनवनवनधर ! धरणघर ! नवकमलसरलदलनयनपर ! ।
गमततमतमतकरसकल !, वरनरवरगणनतपदयमल ! ॥ १

गजकरकरमदनगदहन !, मम परभरमऽपहर वरमहन ! ।
धनदधनदसमशमसदन !, परनरमतमथन ! परमवदन ! ॥ २

परमपरमपदपदवरद !, भ-त-वं पदनतमवनरमपकगद ! ।
भवभवभयभरहरणपर !,
मलमलकलकम-न-लसचरणचर ! ॥ ३

जय यम-मदननमन-दमद !,
जय सकलजनक कलवचनवद ! ।
शशकरकरवररद नचय !, घनघनघन करणशरणसनय ! ॥ ४

एवं निर्मलचित्तभावसलिलव्रातैः स्नपित्वाऽद्भुतं,
चञ्चत्केवलवर्णचित्रसुमनः श्रेणीन्निबध्यद्द्रुतम् ।
श्रीमत्पार्श्वजिनोऽर्चितः पृथुगुणैः स्तोत्रःश्रजाश्रीकरः
भूयात्सौख्यकरः 'प्रमोदसुयशो 'माणिक्य' हीराकरः ॥ ५

(शा.वि.)

## ४०. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(केवलाक्षरमयम्)

भवदवलवनवतमजलद, समसमसमसमधवलरद ।
नय नयपर परमदमपद, हसरसतसशमरसधरणनद ॥ १

गजमतगत गतसकलकल, मतमतहतततरतसकल ।
कसदयरमजय नकलकल, चरदरहरसदवयविमल ॥ २

बहुलकरणकर कजनयन, शममममदमचयलयलवन ।
रजरजपवन हननमधन, छलकलहसततगतपथकथन ॥ ३

अनशनशयनगहनदहन, गरडमरगमनससहनमहन,
अधममदनमदगदकदन, जय जयनसहज जलधरनदन ॥ ४

अजडतशठहठशतदमन, न चपलदशगणचण पदरचन ।
खलबलदलन समयकलन, सभसमवसरण सभदलचलन ॥५

जनकशरदमलभपवदन, सहचरतरजन न गगनतपन ।
अकभरमपहर करणवश-, कर शशकरकरहरकरक हस ॥६

पदनतजनपद जनधरण, गणरणकणहरण शरणशरण ।
अपधनकनकवसनमरण, जरसरसवचन वद भवतरण ॥ ७

समवनवनवननवनधर, जय सदय समयमयलसदधर ।
वरकरवरकरखगनखर, घनघनघनघनघननखर ॥ ८

कटकपटलफणधरभयद, रतनरवरपरमलडहफलद ।
अभयदचरणकमलभसल, सयतनसरसहनभरतसबल ॥ ९

जगदवमहदहहरहरहह, महमहवहनखगमनरयह ।
सरलहृदयनमदमरभर, मघवदनघपरवशलवनपर ॥ १०

असहनकलभकरहशरभ समरजतचमरयममरकतभ ।
शमयमद कमजतदनलक, शममलयजमलनमलनगक ॥ ११

इति केवलवर्णविचित्रपदं, स्तवनं रचितं प्रविहाय मदम् ।
जिन पार्श्वविभो ! भवतात्तदिदं, शिवसौख्यकदम्बकदम् ॥१२

पू.मु.श्री शिवसुंदरविरचितम्

## ४१. ॥ यमकबंधश्रीपार्श्वनाथस्तवनम् ॥

(तोटकं)

वरसं वरसं वरसं वरसं, भवदं भवदं भवदं भवदम् (नवदं४)।
सममा सममा सममा सममा, गमभं गमभं गमभं गमभम् ॥१
(गमनं४)

दरमं दरमं दरमं दरमं, गतरं गतरं गतरं गतरम् (गमनं४) ।
गरसं गरसं गरसं गरसं, नवरं नवरं नवरं नवरम् ॥ २

रमुदा रमुदा रमुदा रमुदा, समिनं समिनं समिनं समिनम् ।
विदितं विदितं विदितं विदितं, नमते नमते नमते नमते ॥ ३

यतना यतना यतना यतना, नयमा नयमा नयमा नयमा (नवमा४)।
क्षणल क्षणल क्षणल क्षणल, क्षरद क्षरद क्षरद क्षरद ॥ ४

प्रमदा प्रमदा प्रमदा प्रमदा, नकरा नकरा नकरा नकरा ।
नवमा नवमा नवमा नवमा, नसदा नसदा नसदा नसदा ॥५

तरसा तरसा तरसा तरसा, दयनो दयनो दयनो दयनो ।
कदमं कदमं कदमं कदमं, विभवा विभवा विभवा विभवा ॥६
(विनवा४)

इति पार्श्वजिनेश्वर ! ते स्तवनं रचितं खचितं यमकैस्सुधनम् ।
परिरञ्जितदक्ष नरप्रकरं कुरुताच्छिवसुन्दर-सौख्यभरम् ॥ ७

पू.मु.श्री धर्मवर्द्धनगणिविरचितम्

# ४२. ॥ अष्टभाषायुक्तश्रीगोडी पार्श्वजिनस्तोत्रम् ॥

प्रणमति यः श्रीगोडीपार्श्वं पद्मा तस्य
न मुञ्चति पार्श्वं सुगुणजनं सुखमेव ।
कीर्तिस्फूर्तिरहो इदृक्षा यस्य जगति
जागर्ति समीक्षा नंनमीह तमेव ॥ १

सद्भक्त्या भक्तलोका जिनवर ! भवतो यत्र यत्र स्मरन्ति,
साक्षात्तेषां समेषां वरमिह हि मुहुर्वाञ्छितं त्वं विधत्से ।
यात्रामायान्ति तत्ते कति कति च मया प्रत्ययाश्चात्र दृष्टा,
हृष्टा मे चित्तवृत्तिस्तत इत इत आकामये नान्यदेवम् ॥ २
(स्रग्धरा) (संस्कृत)

विविहसुविहिलच्छी वल्लिसंताणमेहं
सुगुणरयणगेहं पत्तसप्पुण्णरेहं ।
दलिअदुरियदाहं लद्धसंसिद्धिलाहं
जलहिमिव अगाहं वंदिमो पासनाहं ॥(चित्राक्षरा) (प्राकृत)३

शुलपुलनलवललुचिलविनिलमिदपलमानंद
सकलशुलाशुलशेविदपदशलशीलुहदंद ।
कलुनाशागल कुलकमलालिदिनेशलदेव
चलनशलोजमहं पणमामि निलंतलमेव ॥ (मागधी) ४

(तोटक)
दुहदटिनीदारनदरुनपोअ दुरिदोहहुदासन अदुलदोअ ।
संपूरिदजगदीजं दुकाम पूरय मह वंछिद पाससामि ॥ ५
(शौरसेनी)

तुहताहतवानलनासघनं सुभतानसुकोवितगीतगुनं ।
धरनीशफनीशनतं सततं नम पासजिनं सुसुहं ततत ॥ ६
(पैशाची)

(जगदुदय)
मतनमतसरवनवनतहनपावकं
सिद्धिसुभजुवति सिंगारवरजावकं ।
जो हु तुह चलनजुकमंचते संततं
च कति सव्वे चना पास पनमंति तं ॥ (चूलिकापैशाची) ७

(रोड)
तुह राउल राउलह सामि हुं राउलरंकह
हिणसु दुहाइ सुहाइ कुणसु मइ मा अवहीरह ।
पिक्खइ जुग्गु अजुग्गु ठाणु वरसंतउ किं घणु
पत्तउ पइ जइ होसु दुहिअ सा तुह अवहीलणु ॥(अप्रभंश) ८

(वसंततिलका)
सज्जंतुकामितविधाननिधानरूपं
चित्ते दधामि तव नाम सुगेयरूपं ।
इच्छामि कांतमिदमेव भवे भवेऽहं
वामांगजेह गुणगेहसुपूरितेहं ॥ (समसंस्कृत) ९

(मालिनी)
इम अरज अम्हारी तांहि पक्षीकुरु त्वं
गिणइ जहित कीधुं तस्य सत्यं गुरुत्वं ।
हिव मुज सुख आपो सा तवैवास्ति शोभा
तुज विण कहि स्वामी कस्य नो संति लोभाः ॥ १०

(स्रग्धरा)

स्वर्भाषा संस्कृतीया तदनुप्रकृतिजा मागधी शौरसेनी
पैशाची व्यङ्गरूपानुसृतविधिरपभ्रंसिका सूत्रवाक्यैः ।
षट्भिर्वाग्भी रसैर्वा स्तुतिसुरसवती निर्मिता पार्श्वभर्तुः
श्रीधर्माद्वृधनेनामितसुकृतवतां ह्लादसुस्वाददा स्तात् ॥ ११

पू.मु.श्री कल्याणचन्द्रविरचितम्

श्रीअर्बुदाचलमण्डनश्रीमण्डलिकवसहीमण्डन-

## ४३. ॥ श्रीनवफणापार्श्वनाथस्याऽष्ट-भाषिकम् वर्धमानच्छन्दोभिः स्तोत्रम् ॥

(द्रुतविलम्बित)

प्रणमदिन्द्रशिरोमणिरुग्भरो-दकविधौतपदाब्जरजःकणम् ।
नवफणप्रभुपार्श्वजिनेश्वरं, विनयतो विनुवामि कृतादरम् ॥ १

तव गुणग्रहणादगुणोऽपि सद्गुणगणो मनुजो जिन ! जायते ।
किमुत पार्थिवगन्धगुणोऽनणुः,
सुघनसारदलेन जले भवेत् ॥ २

धृतधनुर्मदनो भवता हतस्तदुचितं रिपुरुद्ध्रियते हठात् ।
सुमनसां मनसां हरणं गुणैः,
कुतवच(त)स्तव कारणमीश ! किम् ? ॥ (संस्कृतम्) ३

(नन्दिनी)

अमरा भजंति सनरा निरंतरं, भगवंतमेव रमणीविरागिणं ।
गुणवंतमेव निपुणा न चाऽगुणं,
परिमानयंति खलु भूमिमंडले ॥ ४

हिमधामवामकिरणानुकारिणो, महिमाभिरामवरसंविदानणो ।
बहवो गुणा गुणिगुरो ! वसुंधरा-
वलयं कला धवलयंति तेऽखिलं ॥ ५

अकलंकचित्तमदरं मुदावहं, बलवंतमंतरमहारिदारणे ।
भवसंभवावतमसावलीहरं, तमहं नमामि भगवंतमुत्तमं ॥ ६

(समसंस्कृतम्)

(वसन्ततिलका)

रेहंति कण्णजुयले तुह कुंडलाइं,
भासंतसंतमणिमोत्तियमंडलाइं ।
दिप्पंतदित्तिभरणिज्जियतेयपूरा,
सेवंति गल्लफलगे ज(न)णु चंदसूरा ॥ ७

एगम्मि सेलसिहरे नवकप्परुक्खा,
चिंतामणी णव किमिच्छियदाणदक्खा ।
सीसे णिही अहव किं धरिया जणस्स,
दाऊं(उं) फणा णव लसंति सिरे जिणस्स ॥ ८

कट्ठं गयं असरणं घणपंचबाण-
वेसानरेण तवियं करुणानिहाण ! ।
वामेय ! देव ! सदयं हिययं करेसि,
दुक्खाउ कंत (कं न ?) भुजगं च समुद्धरेसि ॥ (प्राकृतम्) ९

(मालिनी)

पुरवकदसुतादो दंसणं ते जिणिंदा
णयणविसयमायादं जदा य्येव भंदा ! ।
मम गलिदमसेसं दाव पावं खणेणं
जध किरि(र) हिमजालं भाणुणो दंसणेणं ॥ १०

भमिय भमिय भग्गोऽहं भवे तं सुपत्तं
लहिय जिणवरिंदा ! अम्महे मोहमुत्तं ।
णयणजुगलमेदं अज्ज जादं पवित्तं
फणिदमध च मन्ने अप्पणो माणुसत्तं ॥ ११

अमरगिरिगुहाए कप्परुक्खं च(व?) पासं
खरतरवसहीए अब्बुदे पूरियासं ।
मणिकुसुमफणाली-साहुसाहाभिरामं
णमध फलिदकामं पत्तसच्छायधामं ॥ (शौरसेनीभाषा) १२

णहि हलदि पदीवे णेवयं शशहले वा
पशलिदकलयाले शालदे दिणयले वा ।
तममिधमखिलं तं शंस्थिदं (शंठिदं) हिदयदेशे
उवणयदि विणाशं तक्खणं यिणवलेशे ॥ १३

भवियणमणगेहे यालिशं पयडिदाशं
यणयदि भगवंते दंशणं वलपयाशं ।
यलधलपुलिमुत्ते तालिशं ण हि दिणेशे
कुणदि ण य तधा तं पेक्खिदे कुमुदिणीशे ॥ १४

यणमणभवणोहे णिच्चले किलि अणेगे
गलिदशगलणेहे शन्त(शंत)दं अवि य एगे ।
स्थिलतलयिणदीवे शे तमं अवहणत्ते
कुदुगमदिपयाशं चिष्ठदे खलु कुणुत्ते ॥ (मागधीभाषा) १५

(पृथ्वी)

अनंगभडमुब्भडं सुदढपंचबाणोक्कडं
कुनंति तव सेवका बत विघातपञ्जाजडं ।

पती हि जगतीपती भवसि जेसिमीशे तुमं
बलिट्ठमपि किं लिपुं पलिभवंति ते नाऽकमं ॥ १६

इमंमि किलि दुस्समा-समयकण्हदोसागमे
विमुक्कसललायता-पसलितंमि गाढंतमे ।
भमंति भवकानने जिन दिनेसरा तेंऽगिनो
लभंति सिवपद्धतिं तुममिहं हि दट्ठून नो ॥ १७

सुलासुलनलेसला सुपलिवालसाला हिते
पते तव कते हिते जिनपती ! निसेवंति ते ।
अनंतसुखकंखिनो सुकमलेऽलिनो वा सता
भवंति हि पमातिनो लभिय के हितं कोविता ॥ १८

(पिशाचीभाषा)

(शार्दूलविक्रीडित)

मानेनोन्नतफूथलेन कहनो कोथं थलंतोऽनलं
लोफेनं फलितो चलेन मकले तोसे तथानो अलं ।
ले संसालकफीलफीमचलथी तिन्नो मए तं महं
पत्तो पासचिनोत्तमं कुनकनाकालं हि पोतं अहं ॥ १९

पाताक्कंतमहीतलेऽतिविपुले दंतेहि संलाचिते
उच्चे चालुनितंपपिंपकलिते वल्लीकुथाछातिते ।
मेखाटंपरआतपत्तलचितच्छाये च्छलंफोमते
आसीनो फनसेखलो किलिकचे पासप्पहू लाचते ॥ २०

सामी पासपहू हु मोहचलटो निच्छाटितो चो तए
सो नट्ठून हलातितेवहितयाकाले ठितो निप्फए ।

तेनं तेऽपि विकोपिता विनटिता संसाललन्ने सुला
चुत्तं तस्स न किं भवंति पिसुना सत्थानपाथाकला ॥ २१

(चूलिकापिशाची भाषा)

वंसु उत्तमु वंसु उत्तमु पुहविसुपसिद्धु
धण-कंचण-घण-रयण-सयणवग्गु उ मग्गमुत्तउ
बहु मन्नइ धुरि नरह नरवरिंदु आणंदजुत्तउ ।
सामिसलाहण-म(भ?)त्ति इध फलु इत्तलउ लहंति
भवियण जिण ! माहप्पु तुह कह मारिस जाणंति ? ॥ २२

मणुयलोयहि मणुयलोयहि रज्जु आसज्जि
दहदोइकप्पाहिवइ हविय विविहबहुसुहवभुंजिय
गेविज्जणुत्तरपवरसुहसएहि अप्पाऽणुरंजिय ।
तव विणु केवलु लहिय पय पावइ परमाणंदु
नाममंतु जंपंत तुह भवियण पासजिणिंद ॥ २३

विसमआसण विसमआसण के वि सेवंति
कि(के)वि दुक्करु करइं तवु के वि झाणु झायंति चित्तिहि ।
कि(के)वि कट्ठउ उक्किट्ठुतर चरइं तुज्झ दंसणनिमित्तिहि ।
कटरि कटरि मह पुव्वभव-संचियसुकयअपार
चिंतामणिसम पासपहु अलवि पत्त सुहयार ॥ २४

(अपभ्रंशभाषा)

इति पार्श्वजिनपतिरमितगुणततिविहितसुमतिरनुक्षणं
भाषाभिरष्टभिरभिनुतोऽर्बुदविशदभूधरभूषणम् ।
श्रीकीर्तिरत्नसुखानि दिशतादिह परत्र पदं परं
कल्याणचन्द्रवितन्द्र वदनाकृतिरयं भवतां वरम् ॥ २५

पू.आ.श्री भद्रबाहुस्वामिविरचितम्

## ४४. ॥ चउक्कसाय ॥

"चउक्कसायपडिमल्लइमूरण दुज्जयमयणबाणमसमूरण ।
सर(स)पियंगुब(व)न्न गयगामी जयओ पास भूवणत्तयसामी॥१

जय जिणेस पुहवीतलिमंडण जय जिण दुट्ठकमठमयखंडण ।
जगसमुद्दअइदुत्तरतारण चउगयगमणहरण भयबा(वा)रण ॥२

जसु तणुकंतिकडप्प सणिद्धो सोहइ फणिमणिकिरणालद्धो ।
निम्मलजलहरतडुल्लयलंछिय सो जिणपास पइछओ वंछिय ॥३

कुट्ठाइरोगानलधणहर कुम्मइरत्तिविणासणदिणयर ।
अरियणअट्ठकम्मदलचूरण अप्पओ बोहिबीयफलपूरण ॥ ४

जो ज्झायइ तिवि(वि)हेण त्ति कालइं
संपइ लच्छि हुवइ बहुआलइं ।
भत्तइं भद्दबाहुगणिरइयं सुद्धं पासनाहजिणथुईयं ॥ ५

पू.आ.श्री अभयदेवसूरिविरचितम्

## ४५. ॥ श्रीजयतिहुअणस्तोत्रम् ॥

जय तिहुअणवरकप्परुक्ख ! जय जिण ! धन्नंतरि ! ।
जय तिहुअणकल्लाणकोस ! दुरिअकरिकेसरि ! ।
तिहुअणजणअविलंघिआण ! भुवणत्तयसामिअ ! ।
कुणसु सुहाइ जिणेस ! पास ! थंभणयपुरट्ठिअ ! ॥ १

तइ समरंत लहंति झत्ति वरपुत्तकलत्तइ,
धण्णसुवण्णहिरण्णपुण्ण जण भुंजइ रज्जइ ।
पिक्खइ मुक्ख असंखसुक्ख तुह पास ! पसाइण,
इअ तिहुअणवरकप्परुक्ख ! सुक्खइ कुण मह जिण ॥ २

जरजज्जर परिजुण्णकण्ण नट्ठुट्ठ सुकुट्ठिण,
चक्खुक्खीण खएण खुण्ण नर सल्लिय सूलिण ।
तुह जिण ! सरणरसायणेण लहु हुंति पुणण्णव,
जय धन्नंतरि ! पास ! मह वि तुह रोगहरो भव ॥ ३

विज्जा-जोइस-मंत-तंत-सिद्धिउ अपयत्तिण,
भुवणऽब्भुउ अट्ठविह सिद्धि सिज्झहि तुह नामिण ।
तुह नामिण अपवित्तओ वि जण होइ पवित्तउ,
तं तिहुअणकल्लाणकोस तुह पास ! निरुत्तउ ॥ ४

खुद्दपउत्तइ मंत-तंत-जंताइ विसुत्तइ,
चिर-थिरगरल-गहुग्ग-खग्ग-रिउवग्गवि गंजइ ।
दुत्थियसत्थ अणत्थघत्थ नित्थारइ दय करि,
दुरियइ हरउ स पास देउ दुरियकरिकेसरि ॥ ५

तुह आणा थंभेइ भीमदप्पुद्धुरसुरवर-
रक्खस-जक्ख-फणिंदविंद-चोरा-ऽनल-जलहर ।
जल-थलचारि-रउद्द-खुद्दपसु-जोइणि-जोइय,
इय तिहुअणअविलंघिआण जय पास ! सुसामि ! य ॥ ६

पत्थिय-अत्थ-अणत्थ-तत्थ-भत्तिब्भर-निब्भर-
रोमंचंचियचारुकायकिन्नर-नर-सुरवर ।

जसु सेवहि कमकमलजुयल पक्खालियकलिमलु
सो भुवणत्तयसामि पास मह मद्दउ रिउबलु ॥ ७

जय जोइयमणकमलभसल ! भयपंजरकुंजर !,
तिहुअणजणआणंदचंद ! भुवणत्तयदिणयर ! ।
जय मइमेइणिवारिवाह ! जयजंतुपियामह !,
थंभणयट्ठिय ! पासनाह ! नाहत्तण कुण मह ॥ ८

बहुविहवन्नु अवन्नु सुन्नु वन्निउ छप्पन्निहि,
मुक्ख-धम्म-काम-त्थकाम नर नियनियसत्थिहि ।
जं ज्झायहि बहुदरिसणत्थ बहुनामपसिद्धउ,
सो जोइयमणकमलभसल सुहु पास पवद्धउ ॥ ९

भयविब्भलरणजणिरदसण थरहरियसरीरय,
तरलियनयण विसुन्नसुन्न गग्गरगिर करुणय ।
तइ सहसत्ति सरंत हुंति नर नासियगुरुदर,
मह विज्झवि सज्झसइ पास ! भयपंजरकुंजर ! ॥ १०

पइं पासिवि वियसंतनित्तपत्तंतपवित्तिय-
बाहपवाहपवूढरूढदुहदाह सुपुलइय ।
मन्नइ मन्नु सउन्नु पुन्नु अप्पाणं सुरनर
इय तिहुअणआणंदचंद ! जय पास ! जिणेसर ! ॥ ११

तुह कल्लाणमहेसु घंटटंकारवपिल्लिय,
वल्लिरमल्ल महल्लभत्ति सुरवर गुंजुल्लिय ।
हल्लुप्फलिय पवत्तयंति भुवणे वि महूसव,
इय तिहुअणआणंदचंद जय पास ! सुहुब्भव ! ॥ १२

निम्मलकेवलकिरणनियरविहुरियतमपहयर !
दंसियसयलपयत्थसत्थ ! वित्थरियपहाभर ! ।
कलिकलुसियजणघूयलोयलोयणह अगोचर !
तिमिरइ निरुहर पास ! नाह ! भुवणत्तयदिणयर ! ॥ १३

तुह समरणजलवरिससित्तमाणवमइमेइणि,
अवरावरसुहुमत्थबोहकंदलदलरेहणि ।
जायइ फलभरभरिय हरियदुहदाह अणोवम,
इय मइमेइणिवारिवाह ! दिस पास ! मइं मम ॥ १४

कयअविकलकल्लाणवल्लि उल्लुरियदुहवणु,
दावियसग्ग-ऽपवग्गमग्ग दुग्गइगमवारणु ।
जयजंतुह जणएण तुल्ल जं जणिय हियावहु,
रम्मु धम्मु सो जयउ पास ! जयजंतुपियामहु ! ॥ १५

भुवणारण्णनिवास दरिय परदरिसणदेवय,
जोइणि-पूअण-खित्तवाल-खुद्दासुरपसुव्वय ।
तुह उत्तट्ठसुनट्ठ सुट्ठु अविसंठुलु चिट्ठहि,
इय तिहुअणवणसीह ! पास ! पावाइ पणासहि ॥ १६

फणिफणफारफुरंतरयणकररंजियनहयल !
फलिणीकंदलदल-तमाल-नीलुप्पलसामल !
कमठासुरउवसग्गवग्गसंसग्गअगंजिय !
जय पच्चक्ख ! जिणेस ! पास ! थंभणयपुरट्ठिय ! ॥ १७

मह मणु तरलु पमाणु नेय वाया वि विसंठुलु,
न य तणुरऽवि अविणयसहावु अलसविहलंघलु ।

तुह माहप्पु पमाणु देव ! कारुण्णपवित्तउ,
इय मइ मा अवहीरि पास ! पालिहि विलवंतउ ॥ १८

किं किं कप्पिउ न य कलुणु किं किं व न जंपिउ,
किं व न चिट्ठिउ किट्ठु देव ! दीणयमऽवलंबिउ ।
कासु न किय निप्फल लल्लि अम्हेहि दुहत्तिहि,
तहवि न पत्तउ ताणु किंपि पइ पहु ! परिचत्तिहि ॥ १९

तुहु सामिउ, तुहु माय बप्पु, तुहु मित्त पियंकरु,
तुहु गइ, तुहु मइ, तुहु जि ताणु, तुहु गुरु खेमंकरु ।
हउं दुहभरभारिउ वराउ राउल निब्भग्गह लीणउ,
तुह कमकमलसरणु जिण ! पालहि चंगह ॥ २०

पइ किवि कय नीरोय लोय किवि पाविय सुहसय,
किवि मइमंत महंत केवि किवि साहियसिवपय ।
किवि गंजियरिउवग्ग केवि जसधवलियभूयल,
मइ अवहीरहि केण पास ! सरणागयवच्छल ! ॥ २१

पच्चुवयारनिरीह ! नाह ! निप्पन्नपओयण !
तुह जिणपास ! परोवयारकरणिक्कपरायण !
सत्तुमित्तसमचित्तवित्ति ! नय-निंदयसममण !
मा अवहीरियऽजुग्गउवि मइ पास निरंजण ! ॥ २२

हउ बहुविहदुहतत्तगत्तु तुह दुहनासणपरु,
हउ सुयणह करुणिक्कठाणु तुह निरु करुणापरु ।
हउ जिणपास ! असामिसालु तुहु तिहुअणसामिय !,
जं अवहीरहि मइं झंखंत इय पास ! न सोहिय ॥ २३

जुग्गाऽजुग्गविभाग नाह ! न हु जोयहि तुह सम,
भुवणुवयारसहावभाव करुणारससत्तम ।
सम-विसमइं किं घणु नियइ भुवि दाह समंतउ ?
इय दुहिबंधव ! पासनाह ! मइ पाल थुणंतउ ॥ २४

न य दीणह दीणयु मुयवि अन्नुवि किवि जुग्गय,
जं जोइवि उवयारू करहि उवयारसमुज्जय ।
दीणह दीणु निहीणु जेण तइ नाहिण चत्तउ,
तो जुग्गउ अहमेव पास पालहि मइं चंगउ ॥ २५

अह अन्नुवि जुग्गयविसेसु किवि मन्नहि दीणह,
जं पासिवि उवयारु करइ तुह नाह समग्गह ।
सुच्चिय किल कल्लाणु जेण जिण ! तुम्ह पसीयह,
किं अन्निण तं चेव देव ! मा मइ अवहीरह ॥ २६

तुह पत्थण न हु होइ विहलु जिण जाणउ किं पुण,
हउ दुक्खिय निरु सत्तचत्त दुक्कहु उस्सुयमण ।
तं मन्नउ निमिसेण एउ एउवि जइ लब्भइ,
सच्चं जं भुक्खियवसेण किं उंबरु पच्चइ ॥ २७

तिहुअणसामिअ ! पासनाह ! मह अप्पु पयासिउ,
किज्जउ जं नियरुवसरिसु न मुणउ बहु जंपिउ ।
अन्नु न जिण जगि तुह समोवि दक्खिन्नु दयासउ,
जइ अवगन्नसि तुह जि अहह कह होसु हयासउ ॥ २८

जइ तुह रूपिण किणवि पेयपाइण वेलवियउ,
तुवि जाणउ जिणपास तुम्हि हउं अंगीकिरिउ ।

इय मह इच्छिउ जं न होइ सा तुह ओहावणु,
रक्खंतह नियकित्ति णेय जुज्जइ अवहीरणु ॥ २९

एह महारिय जत्त देव ! एहु न्हवणमहुसउ,
जं अणलीअगुणगहण तुम्ह मुणिजणअणिसिद्धउ ।
एम पसिह सुपासनाह ! थंभणयपुरट्ठिय !
इय मुणिवरु सिरिअभयदेउ विन्नवइ अणिंदिय ॥ ३०

पू.आ.श्री देवभद्रसूरिविरचितम्

## ४६. ॥ श्रीस्तम्भनकपार्श्वनाथस्तोत्रम् ॥

लच्छीलीलाभवणं थंभणयपइट्ठियस्स पासस्स ।
पहुणो पयकमलं रायहंससयसेवियं जयई ॥ १

रागाइरिउनिसुंभणसुत्थीकयसयलधम्मरज्जंगो ।
विजयउ पासस्स चिरं परक्कमो पोढयं पत्तो ॥ २

उदियम्मि जम्मि न तमो नेव पयासन्तरं न अत्थमणं ।
तं पासजोगिरायज्जोइं जोगिप्पियं भरिमो ॥ ३

तुह नाह ! फणिफणारयणकिरणसीमंतिया सलायन्ना ।
देहप्पहा विडंबइ विद्दुमवल्लीजुयं जलहिं ॥ ४

मन्ने फणिफणमणिदीवएहिं अवलोइऊण पणइजणं ।
दुरियाहिंतो रक्खिय धरणो मणवंछियं देइ ॥ ५

सामि ! तुमं विम्हयवसवियसियनेत्तुप्पलाहिं दीसंतो ।
विज्जाहरीहि रेहसि कप्पूरच्छुरियदेहो व्व ॥ ६

तुह पहु ! पायप्पणयं सप्पणयं जणमिणं उवयरंतो ।
वक्खित्तमणो धरणो सासूयं दीसइ पियाहिं ॥ ७

पणएसु अमयवरिसो सरिसो वज्जासणिस्स मच्छरिसु ।
एसो नवो पयावो तुह पहु ! जियरायदोसस्स ॥ ८

दुव्वायदुहियदेहा पित्तुत्ताावियसमत्तगत्तंगा ।
अइदुसहसिंभभिंभलमण-तगुणो सुन्नचेयन्ना ॥ ९

सव्वाऽऽहि-वाहिघत्था सव्व(ह) दुव्वारदुरियविहुरतणू ।
तुह नाह ! सुमरणेण वि वंछियसुहभायणं हुंति ॥ १०

एस च्चिय निरवज्जा विज्जा मंताणिमो महामंतो ।
एत्तो नऽन्नो चुन्नो तिहुयणलच्छीवसीयरणे ॥ ११

सिरिपासस्स भयवओ अट्ठमहाभयपणासणपरस्स ।
नामक्खराइं हियए सययं चिय जं जविज्जंति ॥ १२

पासे पहुम्मि पत्तो (त्ते) मा ज्झूरसु हियय ! निव्वुयं होसु ।
किं सीयइ कोइ कयाइ कप्परुक्खम्मि साहीणे ? ॥ १३

नाह ! तुह पायपायवबहलच्छायासु वीसमंतस्स ।
भवकंतारुत्तारो सुहेण होज्जा लहुं मज्झ ॥ १४

किं वा तुह पहु ! बहु विन्नवेमि विन्नायसव्वनायव्व ! ? ।
तुममेविक्को सरणं ताणं च भवे भवे मज्झ ॥ १५

सिरिदेवभद्ददायग ! नायग ! ससुरासुरस्स भुवणस्स ।
कुणसु पसायं सामी होज्ज तुमं मज्झ पइजम्मं ॥ १६

पू.आ.श्री महेन्द्रसूरिकृतम्

## ४७. ॥ श्रीपार्श्वजिनस्तोत्रम् ॥

नीलुप्पलइहदेहो, फणिंदफणमणिमऊविच्छरिओ ।
अहिणवमेहुव्व फुरंतं(त?) विज्जुओ जयइ पासजिणो ॥ १

अवलोइयंमि तुह पहु !, मुहकमले गलइ पावपंकोहो ।
किं रवि बिंबे दिट्ठे, ठिइ बंधं कुणइ तिमिरभरो ॥ २

तुह पहु ! पयसेवाए, पुज्जंति, मणोरहा असेसावि ।
कप्पतरुणो हि सेवा, कयाइ किं निप्फला होइ ॥ ३

सामि ! तुह दंसणेण वि, दूरंदूरेण जंति दुरियाइं ।
भवियाणं गरुडस्स वि, पलोयणे पन्नगकुलाइं ॥ ४

विज्जा-रज्जं-लच्छी, सोहगमरुग्गयाइं-कमलच्छी ।
लब्भइ तुम्ह पसाया, चिंतारयणस्स व खणेणं ॥ ५

परमेमंतुव्व जए, वम्मानंदण मणंमि निवस्संते ।
वेयाल-वाल-भूया, पस(भ)वंति न साइणी एउ ॥ ६

तुह नामगहणेण वि, गह-विगह-रोग-सोग-माईय ।
उवसमिं (मं)ति खणेणं, जलसित्तारेणुनीरुव्व ॥ ७

सिरिआससेणतणओ, पासजिणो संथुओ मए एवं ।
महइंदसूरिपणओ, निव्वाणपयं पयच्छेउ ॥ ८

पू.आ. श्री धर्मघोषसूरिविरचितम्

# ४८. ॥ श्रीपार्श्वनाथ१०भवस्तवनम् ॥

नवहत्थं नीलाहं वामंगजमाससेणयं पासं ।
भवदहगसंथवेणं थोसामि दुहावराहिगयं ॥ १

पढमभवे पोअणपुरि मरुभूइदिओसि कमठभुअगहओ (१)
पहु ! वणदिओसि बीअम्मि कमकुक्कडभुअगडसिओ (२) ।
तइए पहु ! सहसारे इअरो धूमाइ (३) तिलयपुरि तुरिए
खयरवइ किरणवेगो गहिअवओ कमढभुअगहओ (४) ॥ ३

अच्चुअसुरो तमिअरो रिट्ठाए पंचमे (५) हओ छट्ठे .
कमढचिलाएण सुहंकरापहू वज्जनाहरिसी (६) ॥ ४

तं मज्झिमगेविज्जे सत्तमए सत्तमीए इअरो उ (७) ।
अट्ठमभवे सुरपुरे कणयपहो खयरचक्किमुणी ॥ ५

कमठहरिहरिअजीओ (८) जीओ नवमे भवम्मि तं सामि ! ।
पाणयकप्पम्मि सुरो इअरो पंकप्पहाइ पुढवीए (९) ॥ ६

वाणारसीइ पासो तेवीसइमो जिणो तुमं आसि ।
दसमे कमठकुलिंगी चमढिअकासी अहमहिंदो (१०) ॥ ७

सावणिसअट्ठमि सिवं नाणं चुई चित्तकसिणचउत्थीए ।
